ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

आश्विनमासः
वर्षम् – ६८
द्वादशोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ अक्टूबर २०१८

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–







आश्विने नवरात्रे हि दुर्गापूजा विधीयते।
दृश्यन्ते युग्मनृत्यानि यवाङ्कुरघटादयः॥

भारती संस्कृत-मासपत्रिका

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ६ |
| ५ | संस्कृताभ्युदयगीतम् | मिश्रोऽभिराजराजेन्द्रः | ७ |
| ६ | 'खेंगार' सिंहः | डॉ. हर्षदेवमाधवः | ८ |
| ७ | आधुनिककाव्यपृषताः | डॉ. हर्षदेवमाधवः | ९ |
| ८ | समीक्षागवाक्षः | म.म. देवर्षिकलानाथशास्त्री | ११ |
| ९ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १३ |
| १० | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १४ |
| ११ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | १४ |
| १२ | संस्कृतसेवकानां साम्प्रतिकं कर्तव्यम् | महामहोपाध्याय देवर्षिकलानाथशास्त्री | १५ |
| १३ | शास्त्रभेदेन शब्दभेदः | योगेश्वरस्वामी | १८ |
| १४ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २२ |
| १५ | संस्कृतसमाचाराः | प्रधानसंपादकः | २४ |
| १६ | दानवीरो महर्षिर्दधीचिः | राजीव शर्मा | २५ |
| १७ | ज्ञानमूलम् अभिरुचिः | चरन सिंहः | २६ |
| १८ | सम्मानसमारोहः | वार्ताहरः बद्रीप्रसाद शर्मा | २७ |
| १९ | बृहदारण्यकोपनिषदि वर्णितस्य.... | प्रशान्त शर्मा | २८ |
| २० | किञ्चिद् विनिवेदनम् | डॉ. सत्यव्रत वर्मा | २९ |
| २१ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X


# भारती

## संस्कृत-मासपत्रिका




**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

विद्याः सन्ति पुराणशास्त्रगदिता यस्या विभेदाः शुभाः
मेदिन्यां वनिताः समाः सुललिता यस्याः स्वरूपे स्थिताः।
राकाचन्द्रनिभानना सुरुचिरे सिंहासने संस्थिता
सा दुर्गा नवमूर्तिभिर्द्युतिमती पायादपायाच्चिरम्।।

## मासावतरणम्

कन्याराशिगते रवौ पितृगणान् संपूजयन्त्यात्मजाः
शास्त्रोक्तेन विधानकेन सुधियः कुर्वन्ति श्राद्धं सुताः।
नाना व्यञ्जनराशिभिः सुमधुरैः सन्तर्यपन्त्यग्रजान्,
दत्वा यान्ति शुभाशिषश्च पितरो मासेऽसिते आश्विने।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आश्विनमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
अक्टूबर, 2018
अङ्कः -12
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# वोटबैङ्कनिर्माणाय सर्वकारः सर्वं सहते

...✍ पं. प्यारेमोहनशर्मा

ऐषमः त्रिंशत्तमे दिने जुलाईमासे असमप्रान्तस्य नागरिकतासम्बद्धा पञ्जिका प्राकाशत। अस्यां पञ्जिकायां तेषां नामान्यासन् ये एकसप्तत्युत्तरोन-विंशतितमख्रिष्टाब्दात् पूर्वम् असमप्रान्ते न्यवात्सुः। अधुना असमप्रान्तस्य जनसंख्या विंशतिलक्षाधिकत्रि-कोटिमानात्मिका विद्यते। एषु चत्वारिंशल्लक्ष-संख्यकानां जनानां नामानि अस्यां पञ्जिकायां न विद्यन्ते। एते 1971 वर्षानन्तरमसमप्रान्ते समागता अनधिकारिणो जनाः सन्ति। अनधिकारिणां परिज्ञानाय सर्वोच्चन्यायालयस्यादेशेन एष परिश्रमो विहितः। श्रीप्रतीकमहोदयानां नेतृत्वे प्रतिगृहं गत्वा सहस्रशो जनानां परिश्रमेणेदं कार्यं पूर्णतां गतम्। अनया क्रियया चत्वारिंशल्लक्षकानामनधिकृतरूपेण प्रविष्टानां जनानां परिचयः सम्मुखे समागतः।

यथैव नागरिकतासूची प्रकाशिता तत्कालमेव ममता बनर्जी मुख्यमन्त्री अवदत् असमप्रान्तः प्रज्वलिष्यति। देशे गृहयुद्धं प्रारप्स्यते। सर्वे सेक्यूलरवादिदलानि नागरिकतापञ्जिकाया विरोधम-कार्षुः। एका साप्ताहिकी पत्रिका तु लिलेख यदिदं कार्यं मुस्लिमविरोधि वर्तते। अन्यान्यपि पत्राणि अस्य समालोचनामकार्षुः। ततश्च मानवतावादिनः उदारता-वादिनः तर्कवादिनश्च स्वकीयमाक्रोशं प्राचीकटन्। वराका एते कुत्र गमिष्यन्तीति चिन्ताग्रस्ता अभूवन्।

**पाकिस्तानस्य षड्यन्त्रम् -**

स्वतन्त्रतापूर्वमेव यदा पाकिस्तानस्य रचना समुद्गता तदैव मुस्लिमलीग न्यश्चिनोत् यत् असमप्रान्तमपि पास्तिानस्यैव भागो भविष्यति। एतस्योपायोऽपि सा जानातिस्म यत् क्षेत्रं पाकिस्तानं भवेदिति हेतोः सरलोपायो विद्यते तत्र मुस्लिम-जनसंख्या वर्धापनम्। तदा तत् क्षेत्रं स्वत एव पाकिस्तानं भविष्यति।

आङ्लानां बङ्ग-भङ्ग काल एव मुस्लिमजनसंख्या तत्रावर्धत। स्वतन्त्रताप्राप्तिपूर्वमसमप्रान्ते कांग्रेस-सर्वकारः समभवत् तदा मुख्यमन्त्रिपदे गोपीनाथ बोर्देलोइ समासीनः सञ्जातः। 1944 ख्रिष्टाब्दे एषः सर्वकारः त्यागपत्रमयच्छत्। ततश्च सैय्यद मोहम्मद अब्दुला मुख्यमन्त्री अभवत्। तत्कालमेव तत्र मुसलमानानां जनसंख्या प्रचुरमात्रायामवर्धत। ऊपर अल्ला अधः सादुल्लेति घोषेन सह सहस्रशो मुसलमाना असमप्रान्ते प्राविशन्।

1947 तमे ख्रिष्टाब्दे ''मुस्लिम लीग'' संस्थाया दुरभिसंधिः सफला नैव संजाता। परन्तु पूर्वीपाकिस्तानक्षेत्रेभ्यः ''घुसपैठ'' अवैधप्रवेशः सततं प्राचलत्। स्वतन्त्रभारते असमप्रान्तस्य प्रथम-सर्वकारस्य मुख्यमन्त्री श्रीगोपीनाथबोर्दोलाई एवा-भवत्। एते प्रखरराष्ट्रवादिन आसन्। मोहम्मदअली जिन्ना अजूघुषत् दशवर्षेषु असमप्रान्तः पाकिस्तानस्यैव

प्रान्ते भविष्यति। अमुं कथनं गभीरं मत्वा श्री बोर्दोलाई असमनिवासिनां नागरिकतापञ्जिकां निर्मातुं व्यचारयत्। 1951 तमे ख्रिष्टाब्दे राष्ट्रीयनागरिकतापञ्जिका मूर्तरूपमगृह्णात्। यद्यपि अस्याः पञ्जिकायाः प्रकाशनात् पूर्वमेव बोर्दोलोई दिवं प्रयातः। एषा प्रथमा पञ्जिका अविद्यत यत्र असमप्रान्तवासिनः प्रत्येकस्य जनस्य सम्पूर्णविवरणमुल्लिखितमासीत्।

पाकिस्तानस्य शासका अधुनापि असमप्रान्तं पाकिस्ताने सम्मेलितुं प्रायतन्त। शेखमुजीबुर्रहमान तथा जुल्फीकार अली भुट्टो उभावेव स्वकीयपुस्तकेषु अलिखताम् यत् येन केनापि प्रकारेण असमप्रान्तः पाकिस्तानस्य भागो भवेत्। अतोऽनधिकृतप्रवेशकार्यं निरन्तरं प्राचलत्। इतश्च भारतस्य सेकुलरवादिनः अनधिकृतप्रविष्टा जनाः स्वकीयदलस्य मतदातारो भवेयुरिति प्रायतन्त। अवैधरूपेण एतेषां ''राशन कार्ड'' पत्राण्यपि निर्मितानि। मतदातृसूचीषु नामान्यपि विलिखितानि।

शेखं पाकिस्तानस्य सेनाधिकारिणः कारागरे न्यपातयन्। पूर्वीपाकिस्तानस्य जनतायाः दमनं समारब्धम्। तस्मिन् समये बाँग्लादेशतः प्रचुरमात्रायां जनाः भारते समागच्छन्। 1971 ख्रिष्टाब्दपर्यन्तमेक-कोटिसंख्याका मुसलमानजना असमप्रान्ते बंगालप्रान्ते च प्रविष्टा अभूवन्। दिसम्बरमासस्य षष्ठदिनाङ्कात् 1971 वर्षे भारतपाकयोर्मध्ये जन्यं समारब्धम्। भारतीयाः युवानो दशदिवसेष्वेव बाँग्लादेशं पाकिस्तानात् मुक्तमकारयन्। परन्तु ये बाँग्लादेशीयाः अत्र समागतास्ते अत्रैव न्यवात्सुः।

सम्प्रति सार्धद्वयकोटिमिता बाँग्लादेशीया भारते वर्तन्ते येषु अशीतिसंख्यका असमप्रान्ते उत्तरप्रदेशे पूर्वीराज्येषु च अवैधरूपेण निवसन्ति।

1979 तमे ख्रिष्टाब्दे असमप्रान्तस्य विधानसभायाः निर्वाचनसमये एते बाँग्लादेशीयाः संख्याबलेन सत्ताप्राप्तये लोलुपाः समभवन्। मतदातृसूचीषु नामान्यलेखयन्। तदानीमसमछात्रसंघः निर्वाचन-मवारोधयत् प्रचण्डमान्दोलनं चकार। असमप्रान्तस्य युवानः षड्वर्षाणि यावदान्दोलनं प्राचालयन् 855 युवानो बलिदानमयच्छन् ततः 1985 वर्षे परस्परं सहमतिः (समझौता) समभवत्। तस्मिन् समये राजीवगान्धी प्रधानमन्त्री अवर्तिष्ट। निम्नाङ्कितप्रकारेण सहमतिः संजाता –

1951 तः 61 पर्यन्तं समागतेभ्यो नागरिकता तथा मताधिकारो मिलिष्यति। 1961 तः 1971 पर्यन्तं समागतेभ्यो 10 दशवर्षाणि यावन् मताधिकारो न मिलिष्यति। 1971 वर्षानन्तरं समागतान् वैदेशिकान् भारतात् निःसारयिष्यामः। परन्तु केन्द्रसर्वकारेण पणमेकमत्र संयोजितम्। तदनुसारं न्यायाधिकरण-सम्मुखे व्यक्तिविशेषस्य वैदेशिकता साधिता भवेत्। अनेन प्रकारेण नैकोऽपि वैदेशिक इत्यसाधयन् सेकुलरवादिनः सर्वकाराः। इतश्च असमगणपरिषदः सर्वकारः इमे वैदेशिका इति असाधयत् तानपि केन्द्रसर्वकारेण बाँग्लादेशं प्रेषितुं न कोऽपि यत्नो विहितः।

अतो भारते यः संकटः समागतो वोटलोलुपः केन्द्रसर्वकारस्तदर्थं न किमपि कर्तुमभिलषतीत्येव प्रतीयते।

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

सर्वेशः सर्वभूतात्मा शरण्यः शान्तिविग्रहः।
सर्वसौख्यप्रदो देवःश्रीकृष्णः शरणं मम।। 171।।
योगयोगेश्वरः कृष्णो नित्ययुक्तैरुपासितः।
सुलभोऽनन्यया भक्त्या श्रीकृष्णः शरणं मम।। 172।।
सभायां कुरुभिर्दुष्टैः पीडिता मुक्तमूर्धजा।
रुदती द्रौपदी प्राह श्रीकृष्णः शरणं मम।। 173।।
ध्यात्वा यस्य पदाम्भोजं ज्ञानिनो ध्यानयोगिनः।
लभन्ते सद्गतिं भक्त्या श्रीकृष्णः शरणं मम।। 174।।
श्वेतद्वीपपतिर्विष्णुर्वैकुण्ठाधिपतिर्हरिः।
गोलोकाधिपतिः कृष्णः श्रीकृष्णः शरणं मम।। 175।।
गोवर्धनगिरौ रम्ये सगोगोपालनन्दनः।
वेणुगीतं जगौ कृष्णः श्रीकृष्णः शरणं मम।। 176।।
आत्मारामो ह्याप्तकामो विद्याऽविद्यापतिः प्रभुः।
ध्यानाभ्यासेन विज्ञेयः श्रीकृष्णः शरणं मम।। 177।।
वृष्णीनां सात्वताञ्चैव यदूनां द्वारकौकसाम्।
रक्षको द्वारकाधीशः श्रीकृष्णः शरणं मम।। 178।।
अकारादिस्वराकारः सर्ववर्णात्मको हरिः।
शब्दब्रह्म परं ब्रह्म श्रीकृष्णः शरणं मम।। 179।।
भुक्तिमुक्तिप्रदः कृष्णो भक्तेशो भक्तवत्सलः।
भक्तान् भावयते भक्त्या श्रीकृष्णः शरणं मम।। 180।।
गणेशशेषरुद्रेन्द्रकुमारैः संस्तुतो हरिः।
लीलाकथागुणानन्तः श्रीकृष्णः शरणं मम।। 181।।
इच्छाशक्तिक्रियाशक्तिज्ञानशक्तित्रयीश्वरः।
इच्छाज्ञानक्रियातीतः श्रीकृष्णः शरणं मम।। 182।।
प्रधानः पुरुषः पूर्णः परेशः प्रकृतेः परः।
ईश्वरः परमः कृष्णः श्रीकृष्णः शरणं मम।। 183।।
यमुनापुलिने रम्ये मोहनो मुरलीधरः।
गोवत्सांश्चारयन् गोपः श्रीकृष्णः शरणं मम।। 184।।
दावाग्निवातवर्षाभी रक्षको गोपवल्लभः।
वृजौकसां प्रियः प्राणः श्रीकृष्णः शरणं मम।। 185।।
शालिग्रामशिलाचक्रे पूजितो भगवान् हरिः।
वृन्दानाथो जगन्नाथः श्रीकृष्णः शरणं मम।। 186।।

प्रपन्नाऽभयदो भक्तः भवरोगभयापहः।
सर्वाभीष्टप्रदो देवः श्रीकृष्णः शरणं मम।। 187।।
वेदमन्त्रवपुः कृष्णो वेदमूर्तिः सनातनः।
वेदान्तवेद्यो विश्वेशः श्रीकृष्णः शरणं मम।। 188।।
सर्वाधारो निराधारः सर्वबीजो गुणाधिपः।
सरस्वत्या स्तुतः श्रीशः श्रीकृष्णः शरणं मम।। 189।।
सुरूपः सुस्मितः सौम्यो माधवो मधुसूदनः।
नवीननीरदश्यामः श्रीकृष्णः शरणं मम।। 190।।
तीर्थकीर्तिस्त्रयीमूर्तिः पुण्यकीर्तिः परंतपः।
निग्रहेऽनुग्रहे शक्तः श्रीकृष्णः शरणं मम।। 191।।
ज्ञानयोगगतिः कृष्णः कर्मयोगगतिस्तथा।
भक्तियोगगतिः कृष्णः श्रीकृष्णः शरणं मम।। 192।।
सप्ताहमदधात् कृष्णो गिरिं गोवर्धनं प्रभुः।
गोवर्धनधरो नाथः श्रीकृष्णः शरणं मम।। 193।।
वेदो नारायणः साक्षात् यज्ञो विष्णुरितिस्मृतः।
वेद्यो वेदेषु यज्ञेषु श्रीकृष्णः शरणं मम।। 194।।
प्राणेश्वरो महाप्राणः श्रीलीलापुरुषोत्तमः।
लीलायितो रमानाथः श्रीकृष्णः शरणं मम।। 195।।
यमुनां निर्विषां कर्तुं कालियाहेर्फणासु ह।
नृत्यन्नट वरो ध्येयः श्रीकृष्णः शरणं मम।। 196।।
पूतनामोक्षदः केशी व्योमाघासुरनाशनः।
सर्वासुरविनाशी च श्रीकृष्णः शरणं मम।। 197।।
देवकी हृदयानन्दो दुष्टकंसनिषूदनः।
आविर्भूतः स्वयं विष्णुः श्रीकृष्णः शरणं मम।। 198।।
स्वयोगमाययाच्छन्नः कृष्णः सर्वेश्वरेश्वरः।
क्रीडानरशरीरोऽयं श्रीकृष्णः शरणं मम।। 199।।
वृतः षोडशसहस्रराजकन्याभिरादृतः।
सौभाग्यवरदः कान्तः श्रीकृष्णः शरणं मम।। 200।।
मन्त्रः कृष्णो हविः कृष्णः कृष्णो यज्ञो हुताशनः।
होता भोक्ता च यज्ञानां श्रीकृष्णः शरणं मम।। 201।।
''जय जय श्री कृष्ण मन्त्र महास्तोत्रे षष्ठो विरामः''
।। श्रीकृष्णः शरणं मम।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

# संस्कृताभ्युदयगीतम्

❑ मिश्रोऽभिराजराजेन्द्रः

## १. न मृता, म्रियते न मरिष्यति वा !!

न मृता, म्रियते न मरिष्यति वा

सुरवागमृता सुखदा वरदा
द्विषतां नियतिं घटयिष्यति वा ।। १ ।।

निगमाऽगमगीतिमयी रुचिरा
रघुनाथकथामहिता मधुरा
पुनरद्य दशाननकर्मरतान्
घननादमुखान् निहनिष्यति वा ।। २ ।।

नरपालभगीरथसङ्कलिता
सुरसिन्धुरियं गगनाद्गलिता
विशदाश्रमभव्यविनाशपरान्
अभिशप्तजनान् क्षपयिष्यति वा ।। ३ ।।

इयमार्षतपोनिधिसञ्चयिनी
विपदां शमनी वसुधोज्जयिनी
इयमञ्चितसंस्कृतिकीर्तिकथा
अधुनाऽपि भुवं कलयिष्यति वा ।। 4 ।।

अमृतादधिकं परिपोषकरी
सुकृतादधिकं भवदोषहरी
पदबन्धरसामृतचारुचयै-
श्चितिनीरसतां रसयिष्यति वा ।। ५ ।।

## २. वर्धतां देववाणी

चिरं वर्धतां श्रीमतां देववाणी
शुभं शंसतां श्रीमतां देववाणी ।। १ ।।
स्फुरद्गोमुखात्स्वर्णदीव प्रसूता
पुनाना भुवं भासतां देववाणी ।। २ ।।
यवं सिंहलं स्वर्णभूमिं कटाहम्
अलङ्कुर्वती स्फायतां देववाणी ।। ३ ।।
प्रसूनोपमानङ्गवङ्गान्ध्रचोलान्
मिथो बध्नती बृंहतां देववाणी ।। ४ ।।
हिमाद्रेर्मुखादा च कूलात्पयोधेः
समेषां मुखे स्पन्दतां देववाणी ।। ५ ।।
स्फुटं कृण्वती विश्वमार्यं समग्रम्
मधुच्छन्दसां जृम्भतां देववाणी ।। ६ ।।
निजाऽस्थानुकूलाऽध्वभिर्गत्वराणाम्
गतिं चिन्मयी कल्पतां देववाणी ।। ७ ।।
गलत्प्रीतिमाकन्दनीपैर्मधूकैः
वसन्तोत्सवे क्षीबतां देववाणी ।। ८ ।।
प्रभा शाश्वती व्योम्नि वैकर्तिनीयम्
जगन्मण्डले रोचतां देववाणी ।। ९ ।।
कवीनामहोरात्रकाव्यप्रकल्पैः
भृशम्मेदतां घूर्णतां देववाणी ।। १० ।।
सतां धर्मसंस्कारशिक्षाव्रतानाम्
सदा हृत्समा स्पन्दतां देववाणी ।। ११ ।।
स्वयात्रापथे प्रत्यवायोन्मुखानाम्
गतिं रक्षसां स्तम्भतां देववाणी ।। १२ ।।
भुवि ख्यापिते स्वाभिधानेन वर्षे
प्रतिष्ठापनैर्द्योततां देववाणी ।। १३ ।।
पुरा कालिदासैरितश्चाऽभिराजैः
समज्ञां परां विन्दतां देववाणी ।। १४ ।।

भूतपूर्वः कुलपतिः,
सनराइज विला, लोअर समर हिल
शिमला

# 'खेंगार' सिंहः

❑ डॉ. हर्षदेवमाधवः

कोलियाकग्रामे अहं ग्रामजीवनं नितान्तम् अन्वभवम्। तदा मम किशोरावस्था अपि च यौवने संक्रमणकालः आसीत्। दशम्यां कक्षायाम् अहम् अपठम्। केचित् क्षत्रियवयस्याः मम सुहृत्तमाः जाताः। कोलियाकग्रामे लघुका विपणीः, सङ्कीर्णा मार्गाः ग्रामचरणं प्रक्षालयन्ती मधुरा नदी, नद्याः अपरे पार्श्वे गून्दीग्रामः, पर्यन्ते विविधाः छायाद्रुमाः नातिदूरे समुद्रः-एतत् सर्वं मह्यं रोचते स्म। गून्दीग्रामे राजपुत्राः (राजपुत्र) अपि च क्षत्रियाः बहुधा न्यवसन्। ते सर्वे उदारचरिताः, स्वात्माभिमानिनः उग्रस्वभावाः तथापि सर्वान् प्रति दयान्विता आसन्, किन्तु खेंगारसिंहस्य स्वभावो भिन्न आसीत्।

खेंगारसिंहः धनाढ्यः दुर्ललितः अपि च उद्दण्डः प्रतीयते स्म। तस्य समीपे नैकानि क्षेत्राणि आसन्। स निर्धनकृषीवलैः कृषिम् अकारयत्। प्रतिदिनं कुन्दनयानेन (स्कूटर) इतस्ततो भ्रमणं द्वि-त्रिवारं ग्रामे गमनागमनं उच्चैः सर्वैः सह वार्तालापः - एतत् सर्वं तस्य वैशिष्ट्यम् आसीत्। स कोष्ठे महतीं कोष्ठरोमावलीम् अधारयत् अपि च वारं वारं तां रोमावलीं सगौरवमस्पृशत्। तस्य हस्ते सदैव होकीक्रीडायाः यष्टिः अशोभत। कटिभागे स कृपाणिकाम् अबध्नात्। वयं नदीतटे बालुकासु उपविश्य रात्रिकाले तस्य विषयकां कथां अकरवाम। खेंगारसिंहः प्रतिदिनं मदिरापानं कृत्वा रात्रौ प्रलापं कुर्वन् कोलियाकग्रामात् गून्दीग्रामम् अगच्छत्। ग्रामस्य पुलिसरक्षकः तं दृष्ट्वा प्रणम्य अगच्छत्, किन्तु सुरापानोन्मत्तं तं ग्रहीतुं तस्य शक्तिर्नासीत्। स निर्धनस्त्रियः स्वक्षेत्रं नीत्वा दुर्व्यवहारम् अकरोत् इति मम वयस्याः अकथयन्। अत एव स्त्रियः तं दृष्ट्वा अन्यां रथ्यां अगच्छन्। खेंगारसिंहः विपणीं गत्वा यथेच्छम् अगृह्णात्। तथापि कोऽपि वणिक् न किञ्चिद् ब्रवीति। तस्य मदिरापानस्य व्यवस्था प्रतिदिनं भवति स्म। सर्वे कर्मकराः तस्य भयात् अवेपन्त। तथापि तस्य क्षेत्रेषु श्रमं कर्तुं न कोऽपि न्यक्कारम् अवदत् अथवा न्यक्कारं भणितुं कस्यापि साहसं नासीत्।

खेंगारसिंहस्य धूमपानस्य व्यसनं बहु चर्चितमासीत्। तस्य ओष्ठो सततधूमपानेन श्यामो जातः। स लीलया एकोत्तरमेकं सिगरेटपानानन्दं प्रादर्शयत्। अथ किम् ? स मन्दिरस्य समीपे गच्छन् दूरादेव प्राणमत् कदाचित् मन्दिरं न प्राविशत्। तस्य भक्तिः दूरादेव तादृशी आसीत्। स अवदत्, 'ईश्वरे मम श्रद्धा न वर्तते, अहं तु स्वेच्छानुसारं जीवामि, अहं भगवत् सकाशात् न किञ्चित् कामये, न तं किञ्चित् दातुमिच्छामीति।'

एकदा वयं शालायाः कक्षे पठनरताः आस्म तदा सहसा बहिः मार्गे कोलाहलम् अशृणुम। मार्गे पुलिसयानात् केचित् पुलिसाः अवतीर्य उच्चैः वार्तालापम् अकुर्वन्। ते द्वित्रान् युवकान् निगडबद्धान् कृत्वा आनयन्। शनैः शनैः ज्ञातं यत्, पूर्वरात्रौ खेंगारसिंहस्य हत्या जाता। तस्य शवः कृपाणिकाप्रहारग्रस्तो रुधिराप्लावित एकस्मिन् कूपे प्राप्त आसीत्। कयापि नार्या तस्य हस्तात् स्वात्मानं त्रातुं प्रहाराः कृताः इति केचन वदन्ति स्म। कैश्चित् निर्धनैः श्रमिकैः धनं प्राप्तुं स व्यापादित इति केचित् वदन्ति स्म, अथवा भूमिविवादे केनापि शत्रुणा स रात्र्यन्धकारे हतः इति कोऽपि जानाति स्म अथवा रात्रौ कोऽपि लुण्ठाकः तस्य धनं हृत्वा तं व्यापाद्य कूपे निक्षिप्तवान्। अथवा स्वयमेव मदिरामत्तो भूत्वा स एव स्वकृपाणिकया स्वात्मानं नाशितवान्। पुलिसैः तस्य हत्यारहस्यं ज्ञातुं प्रयत्नाः कृताः किन्तु तद् रहस्यं रहस्यमेव अवशिष्टम्। अद्यापि कदाचित् खेंगारसिंहस्य छविः मनसि अङ्किता भवति। स्मर्यते तस्य धूमपानाभिनयः, तस्य अनर्गलवार्तालापः तस्य ओष्ठरोमा-वलीनर्तनं, तस्य तर्जनम् अपि च तस्य मदिरापानमन्थरं भ्रमणम्।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

आधुनिककाव्यपृषताः

# आधारपत्रमेवास्ति पुण्यदम्

❑ डॉ. हर्षदेवमाधवः

एकदा रोगपीडाभिर्जातः परवशो ह्यहम्।
अनयन् बान्धवाः सर्वे रुग्णालयं च विह्वलाः।।
अपृच्छद् वैद्यवर्योऽसौ 'कुत्रास्त्याधारपत्रकम्' ?
विनाऽऽधारं चिकित्सा मे शक्या नास्ति कथञ्चन।
आहुर्मे बान्धवाः किञ्चिद् विहस्य तं तदैव यत्।
अन्येषां हि गृहीत्वा य आधारं खलु जीवति।
कथं नु प्राप्यते तस्य श्रीमन्! आधारपत्रकम्।
आगता ऋणदातार आधारो जीवितुं मम।
ततश्च गुलिकाश्चित्राः सूचिक्षेपाश्च दुःखदाः।
शस्त्रक्रियास्ततो जाता जीविताधारहेतवः।।
चिकित्सकस्ततस्त्यक्तुं निराधारञ्च मां पुनः।
'रोग एष असाध्योऽस्ति' अवदच्चातिनिर्घृणः।।
पत्नीमाहूय शीघ्रं हि मया तस्यै निवेदितम्।
आधारपत्रमेवास्ति शरणं ते ह्यतः परम्।।
श्मशानं मेऽनयन् सर्वे शरीरं पाञ्चभौतिकम्।
विना त्वाधारपत्रेण चिताकाष्ठं न दीयते।।
इत्युक्त्वा काष्ठविक्रेता गतो दूरं शवान्मम।
उक्तवान् मम पुत्रोऽसौ 'आधारो नो गतोऽधुना।।
वयं सर्वे निराधाराः पत्रेण किं प्रयोजनम्?'
मृत्योः पश्चात् ततो दृष्टश्चित्रगुप्तो महामतिः।।
चित्रगुप्तोऽपि शान्तात्मा ह्यपृच्छन्मां तदा शनैः।
'आधारपत्रमानीतं त्वया सार्धं न वत्स! किम् ?'
आत्माधारस्त्वया नाथः नाशितो धरणीतले।
अधुना समीपे किञ्चिन् नानेतव्यं मया सह।
अवदम् तं च सक्लेशं सोऽनयन् मां प्रभुं ततः।
'पुत्र ! आधारपत्रं ते नास्ति गच्छ धरातलम्।
वैकुण्ठे शिवलोके वा प्रवेशस्तेऽतिदुर्लभः।।'
मयोक्तं दीनया वाचा 'नरके निक्षिपतु प्रभो!'
यमराजस्तदा रुष्टः सक्रोधमुक्तवान्, 'न हि
आधारपत्रहीनाँस्तान् दुर्जनाँश्च नराधमान्।
सन्त्रासवादिनां देशं क्षिपामो धरणीतले।
अतस्तव कृते नास्ति, स्थानं तु नरकेष्वपि।'
तदा दृष्टो मया साक्षात् नारायणश्चतुर्भुजः।
अधावम् शीघ्रमेवाहं नम्रो भूत्वा जगत्पतिम्।।
'त्रैलोक्यस्य सदाधारस्त्वमेव परमेश्वर।
स्वीकुरु मामनाथं त्वम्' सशोकमुक्तवान्नहम्।।
'अज्ञातकुलशीलस्य, आधाररहितस्य च।
निवासो नैव शक्योऽस्ति क्षिपैनं धरणीं पुनः।'
सोद्वेगं भगवानाह... पतितोऽहं धरातले।
न सा विद्या, न तज्ज्ञानं, न तच्छिल्पं न सा कला।
प्रवासो न निवासोऽसौ प्रतिष्ठा न यशोऽपि वा।
विदेशे गमनं वापि स्वदेशे भ्रमणं पुनः।
आधारपत्रहीनं तु यत्कृतं तन्नु निष्फलम्।।
दानं पुण्यं जपो वापि व्रतानि विविधानि वा।
आधारपत्रयुक्तस्य कलां नार्हन्ति षोडशीम्।।
न शीलं, नैव ज्ञानञ्च, चारित्रं सद्गुणाः कलाः।
आधारपत्रमेवात्र, स्थाने स्थाने महीयते।।

8, राजतिलक बंग्लोज, आबादनगरम्,
बसस्टोप के पास, बोपल, अहमदाबाद-380058

❑ डॉ. हर्षदेवमाधवः

# प्रदूषण-नियन्त्रणे-प्रमाणत्रम् ( P.U.C. )

प्रतिदिनं
राजनीतिज्ञानां
मलिनाधिक्षेपमयी भाषा,
धर्मान्धाग्निप्रज्वलनधूममया विचाराः,
कामसिक्तचलचित्रदृश्यावलीकणानां रजांसि,
वृत्तपत्रविषाक्तवृत्तान्तस्मृति-लेशाः,
स्वार्थमिश्रितानां संसारसम्बन्धानां तमोधूलिकणाः
एतत् सर्वेण
मनांसि
प्रदूषणनियन्त्रणरहितानि जातानि,
कथं.. कुत्र वा..
प्रदूषणनियन्त्रणं कर्तुं शक्यम्?
इमानि मनोयन्त्राणि...
दुर्घटनास्थगितं करिष्यन्ति अत्यधिकप्रदूषणवशात्
विश्वस्य जीवनम्।
(यदि प्रदूषणनियन्त्रणं मनसा न करिष्यति कोऽपि गुरुः,
पयगम्बरो वा, अवतारो वा)

---

❑ डॉ. हर्षदेवमाधवः

# स्वच्छविः ( Selfie )

अहं गृह्णामि
स्वच्छविं
यतोऽहं
पश्येयं पृष्ठतो मे विश्वचेतनाम्,
मयि
द्रष्टुं शक्नुयां
ब्रह्माण्डचैतन्यम्,
अनुभवेयं मे हास्ये
मम सर्जकस्य प्रसन्नताम्,
विस्मरेयं मम शान्त्यां
सन्त्रासकोलाहलम्,
निमज्जेन्मे श्रद्धायां
द्वैतभावम्,
स्पृशेयं
मम नेत्रयोः
प्रातःकालोन्मीलितपुष्पस्वप्नम्,
दृश्येत नभसश्शान्तरूपं पृष्ठभूमौ।
अर्धोद्घाटितयोरोष्ठयोः
शृणुयाम्
काव्यशब्दम्,
क्षिपेयं चिन्तास्यूतम्
बाल्यकाले
यथा
ह्यक्षिपम् शालास्यतुम्।
जानाम्यहं यत्
सहस्रशतरूपेषु
यद्विलसति
तदहन्ता मे केवलम्,
अत एव
स्वच्छविं दृष्ट्वा
पुनरपि प्राप्नोम्यहं
मामेव,
यस्मिन् वर्तन्ते सर्वे.....
त्वद्भावाः,
त्वमपि
पश्य मे छविम्,
कदाचित्
पश्येस्त्वां मय्येव।।

8, राजतिलक बंग्लोज, आबादनगरम्,
बसस्टोप के पास, बोपल, अहमदाबाद-380058

समीक्षागवाक्षः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# संस्कृतपत्रिकाः

## कथासरितः संयुक्ताङ्कद्वयम्

संस्कृतकथानां षाण्मासिकी पत्रिका ''कथासरित्'' निरन्तरं प्रवहतीति प्रमाणयदस्यास्तरङ्गद्वयं सपद्येव प्राप्तम्। पञ्चविंशस्तरङ्गो बालकथाविशेषाङ्कोऽस्ति। अस्मिन् हि एकादश बालपाठ्याः कथाः, पञ्चदश संक्षिप्तकथाः, एका स्पशकथा, चतस्रः अनूदितकथाः बालकानां रुचिमनुरुध्य प्रस्तुताः सन्ति। धारावाहि-कथाद्वयं, ग्रन्थसमीक्षा इत्यादयो नियमिताः स्तम्भास्तु यथायथं संनिवेशिता एव। इत्थमेव षड्विंशे तरङ्गेऽपि 8 कथाः एका त्रासदकथा, द्वे स्मृतिकथे, तिस्रो बालकथाः, षडनूदितकथाः डॉ. राधावल्लभत्रिपाठिनो धारावाहिनी कथा तथा समीक्षा, वार्तादयः स्तम्भा यथायथं द्रष्टुं शक्यन्ते। 2017-18 ई. वर्षानुगतमिदं तरङ्गद्वयं सरितोऽस्याः सातत्यं व्यनक्ति। अमरभारत्यां कथा कविता-सरितः पाठकान् माधुर्यपीयूषेण परिषिञ्चन्ति तथैव कथासरितोऽपि तान् प्रमोदयन्तीत्याधुनिकसाहित्यसमी-क्षकाणां प्रमोदस्य विषयः।

**कथाभारती (षाण्मासिकी) सम्पादकौः बनमाली विश्वालः, नारायणदाशः, प्रका. कथाभारती, कोलकाता, मू. 50/- अङ्कस्य, 100/- संयुक्ताङ्कस्य, 250/- त्रैवार्षिकम्, सम्पर्कः 57, वसन्तविहार, झूसी, इलाहाबाद।**

## शिक्षाकेन्द्रप्रकाशिताः पत्रिकाः

संस्कृतशिक्षाकेन्द्रेभ्यः शोधपत्रिकास्तु प्रकाश्यन्त एव, प्रशंसनीयाश्च ताः, संग्रहणीयाश्च किन्तु बहुविधाः संस्कृतपत्रिकाः समये समये शिक्षासंस्थाभिः प्रकाश्यन्ते यासां सूचनाः कतिधा प्रसार्यन्ते, प्राप्यन्ते च संस्कृत-सेविभिः किन्तु कतिधा न प्रसार्यन्ते तासां वृत्तानि। जयपुरे केन्द्रीयविद्यालयसंगठनस्य विद्यालयाः सुप्रतिष्ठिताः सन्ति प्रशस्याश्च ते। तेषां क्षेत्रीयकार्यालयतः शिक्षकाणा-मनवरतप्रयासानां फलस्वरूपं वार्षिकी संस्कृतपत्रिकैका 2018-2019 वर्षमुपलक्ष्य सपद्येव प्रकाशमायाता यस्याः सुरुचिरं साधीयश्च प्रकाशनं वर्धापनमर्हति।

''संस्कृतवल्लरी'' नामवाहिनी सेयं पत्रिका संस्कृत-भाषाया महत्त्वं, गरिमाणमितिहासं च प्रकाशयतां लेखानां सुचिक्कणपत्रेषु बहुरङ्गरञ्जितां प्रस्तुतिं कुरुते। 27 लेखाः संस्कृते, लेखद्वयं हिन्द्याम्, एको लेख आङ्गलभाषायां मुद्रितः। देवर्षिकलानाथशास्त्रिणा हिन्द्याम्, डॉ राधावल्ल्भ त्रिपाठिना चाङ्गलभाषायां संस्कृतस्य महिमा वर्णितः। सर्वविद्याशिक्षोपयोगिनी सामग्री पत्रिका-मिमामुपयोगिनीं साधयति।

प्रतिवर्षं संस्कृतदिवसोपरि राजस्थानशासनेन संस्कृतविद्वांसः सम्मान्यन्ते, शिक्षकाः पुरस्क्रियन्ते, समारोहश्चाऽऽयोज्यते। अस्मिन्नवसरे ''श्रावणी'' त्यभिधानवाहिनी पत्रिकाऽपि प्रकाश्यते इति जानन्त्येव सुधियः। अस्मिन् वर्षेऽपि श्रावणीयं प्रकाशिताऽभूत्। श्रावणी-दिवस एवं संस्कृतदिवसत्वेन संमान्यत इति नामधेयमिदं समीचीनमेव।

वर्षेऽस्मिन् प्रकाशिता ''श्रावणी'' दश लेखान् संस्कृते, पञ्च हिन्द्यां, द्वौ आङ्गलभाषायां प्रस्तौति। संस्कृतपत्रिकाणां सूचीमपि प्रकाशयति। सम्मानितानां विदुषां परिचया अप्यस्यां प्रकाशिताः सन्ति। इत्थं राजस्थानीयसर्वकारस्य संस्कृतशिक्षानिदेशालयेन प्रकाशितेयं पत्रिका शिक्षासंस्थानीयसंस्कृतपत्रिकासु सप्रशंसं परिगणनीयतां बिभर्तीति प्रमोदावहम्।

इत्थं शिक्षानिदेशालयप्रभृतिभिः, केन्द्रीय विद्यालयप्रभृतिभिः, संस्कृतविश्वविद्यालयैश्च संस्कृत-पत्रिकाणां प्रकाशनं यथासमयं विधीयते इति परिज्ञानं संस्कृतसेविनां कृते सन्तोषावहं स्यात्।

## श्रद्धाञ्जलिविशेषाङ्कः

विदन्त्येव संस्कृतसेविनो यज्जिनशासनानुयायि-भिर्विद्वद्भिर्मुनिवर्यैश्च संस्कृतभाषाया अध्ययनं विधाय तस्यां लेखनेन, साहित्यरचनया पत्रिकाप्रकाशनेन, पुस्तकप्रकाशनेन च संस्कृतवाङ्मयस्य साधीयसी सेवा विहिताऽस्ति। जिनशासनानुयायिभिरनेकाः संस्कृत-पत्रिकाः प्रकाश्यन्ते इति ज्ञात्वा को न संस्कृतसेवी प्रसीदेत्? नन्दनवनकल्पतरुः, निःश्रेयसम्, सेतुबन्धः इत्यादयः संस्कृतपत्रिकाः संस्कृतवाङ्मयस्य श्रीवृद्धिं कुर्वन्ति। तासां परिचयः समये समये समीक्षास्तम्भादिषु प्रकाश्यतेऽपि।

''श्रमण'' ''श्रुतसागर'' प्रभृतिष्वनेकासु जैन-साहित्यसेविकासु पत्रिकास्वपि संस्कृतबद्धाः कृतयः प्रकाश्यन्ते। निर्जरगिरो व्यापकत्वमनेन स्पष्टीभवति। सपद्येव **श्रीनिःश्रेयसम्** षाण्मासिकपत्रिकाया 12 विशेषाङ्कः पूज्यपादानां श्रीमत्प्रेमसूरीश्वराणां सप्तविंश-समाधिसुवर्णपर्वोपलक्ष्ये तेषां कृते श्रद्धाञ्जलिरूपः प्रकाशितो यत्र विशालेष्वष्टसु विभागेषु सूरिवर्याणां कृते मुनिवर्याणां श्रद्धाञ्जलयः, संस्मरणानि प्रशस्त्यादीनि च प्रकाशितानि। मसृणपत्रेषु बहुरङ्गरञ्जितमिदं प्रकाशनं सकलं केवलसंस्कृतभाषाबद्धमस्तीति विज्ञाय को न प्रसीदेत्? पन्यासश्रीसम्यग्दर्शनविजयगणिसम्पादितेऽ-स्मिन् विशाले विशेषाङ्के पद्यबद्धाः गद्यबद्धाः केवलं संस्कृतमयरचनाः सिद्धान्तमहोदधिप्रेमसूरीश्वरमहिमानं प्रख्यापयन्ति, संस्कृतभाषामहिमानं तु स्वत एव प्रख्यापयन्तीति सूचनां प्रहिण्वन्त प्रसीदामः। विशेषाङ्कस्य नामाऽस्ति ''प्रेमपारायणम्'' इति।

**श्रीनिःश्रेयसम्, श्रुतज्ञानभवनम्, आनन्द नगर सोसाइटी, पालड़ी, अहमदाबाद।**

---

**संस्कृत समाचाराः-**

# विद्यावाचस्पति पं. मधुसूदन ओझा महाभागानां स्मृतौ संगोष्ठी समायोजिता

जयपुरम्। विद्यावाचस्पति पं. मधुसूदन ओझा महाभागानां जन्मदिवस-समारोहावसरे जयपत्तनीय-मञ्जुनाथस्मृति संस्थान-व्यास बालाबक्षशोधसंस्थानयोः संयुक्त-तत्त्वावधाने 2 सितम्बर 2018 दिनाङ्के जन्माष्टम्यां ''विद्यावाचस्पति पं. मधुसूदन ओझा सारस्वत वाङ्मय की साधना'' इति विषये अग्रपीठाधीश्वराणां डॉ. राघवाचार्य वेदान्तिनामाध्यक्ष्ये राज्यस्तरीया संगोष्ठी समायोजिता। संगोष्ठ्यां मुख्यवक्तारः भारतीविद्या-मनीषिणः पण्डित अनन्तशर्माणः आसन्। डॉ. दयानन्द भार्गव महोदयेनापि पं. ओझा महोदयानामवदानविषये स्वविचाराः प्रस्तुताः। संगोष्ठ्यां राष्ट्रपति सम्मानिता देवर्षि कलानाथ शास्त्रिणः श्रीमती शकुन्तला शास्त्री, महामण्डलेश्वरज्ञानेश्वरपुरी महोदयाः बी.आर. दुबे, पं. प्यारेमोहनशर्माणः, डॉ. नारायणशास्त्री काङ्करः, डॉ. राजेश्वरीभट्ट महोदया, डॉ. राजकुमार जोशि महोदयाश्च विचारसंसदि सहभागिन आसन्। डॉ. रामदेवसाहूः डॉ. सुरेन्द्रकुमारशर्माणश्च संगोष्ठीकार्यक्रमस्थेभ्यो धन्यवादं प्रस्तुतवन्तौ। कार्यक्रमस्य संचालनं पं. चन्द्रप्रकाशर्मणा कृतम्।

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

सप्तत्रिंशः प्रसङ्गः

# प्रभावकारिणी घटना

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

गुरुणा अतिस्नेहेनैवं प्रबोधितोऽहं द्विविधायां पातितः। अहमनुभवन्नासं गुरोर्ध्वनौ मां प्रत्यत्यन्तं स्नेहः वर्त्तते। मम पित्रा सह तेषां सुदृढं सख्यमासीत्। कारंजानगरात्स्थानान्तरणे जाते ते मां तेभ्यः समर्प्यैव गताः। अहं स्वस्थाने उपविष्टः। मम बुद्धौ नायातिस्म मह्यं ते यावत् स्निह्यन्तिस्म अद्य ततोऽप्यधिकं स्नेहिनः कथं परिलक्ष्यन्ते।

अधुना त्वतिसंकटे पतितः। गुरोरतिप्रेमपूर्ण आग्रहः कल्याणभावना चैकतः, लोकमान्यतिलकदर्शनाभिलाषा चैकतः। विचारद्वयमध्ये परस्परमतीव संघर्षः संजातः। न ज्ञायते कथं सहसा पुनरप्युत्थितोऽहम्। अहमवदम्- श्रीमन्! अधुनैव मया बाष्पयानविश्रामस्थले गन्तव्यमस्ति। अहमवकाशं वाञ्छामि। किंचित्तीव्रदृष्ट्या गम्भीरेण ध्वनिना प्रधानाध्यापकोऽवदत् किमर्थम्? अहमवदम्-लोकमान्यतिलकस्य दर्शनार्थम्। अद्य अधुनैव बाष्पयानविश्रामस्थले तेषां भाषणमस्ति। मया श्रोतुं गन्तव्यमस्ति।

''आम् इयं वार्ताऽस्ति'' विद्युदिव कर्कशेन ध्वनिना प्रधानाध्यापकः उच्चैराक्रन्दत। क्षणद्वयात्पूर्वं यस्मिन् वदने स्नेहो मृदुता च परिलक्ष्यतेस्म तत्रैवाधुना प्रज्वलन्त अङ्गाराः दृश्यन्ते स्म। अक्षिणी विस्फार्य घूर्णयन्तस्ते अवदन्- महानागतः कुतोऽयं देशभक्तः-कथयति लोकमान्यतिलकस्य भाषणं श्रोतुं गमिष्यामि। पितुः सम्यक् प्रचलन्तं राज्यसेवाकार्यं तुभ्यं न रोचत इति प्रतिभाति। तेषां सेवाकार्यमधुना समापयितुमभिलष्यते।

प्रधानाध्यापकस्यैवं तीव्रगर्जनतर्जनयोः सम्मुखे शून्य इवाभवम्। एवं भासतेस्म शिरसि सहसा हिमोपलवृष्टिः संजाता। अत एवाग्रे ते किं किं कथयन्त आसन्निति मया न तदा ध्यायते स्म न च श्रुतम्। ते पूर्णावेशपूर्वकं ममाभिमुखाः शिरः प्रति अङ्गुलिं नर्तयन्तः मम सम्पूर्णस्य वर्षचतुष्टयात्मकस्य विद्यार्थिजीवनस्य विवरणं प्रकाशयन्त आसन्। सर्वेषां छात्राणां संमुखे कक्षायां, शालायां, क्षेत्रे, राजमार्गे, प्रातः सायम्, ज्ञाताज्ञाताः, कृताकृताश्च यावन्त्यस्त्रुटयस्तेषां स्मृतिकोषे आसन् ताः सर्वास्तैः जलप्रपातवेगेन वर्णिताः। अयं निष्कर्षश्च घोषितः मम कुलेऽहं कुपुत्रः संजातः। पुनश्च तैः मम ध्यानमाकर्षयन् कथितम् यावज्जीवं धूलिभक्षणलक्षणानि दृश्यन्ते त्वयि।

इदं-सर्वमभूत्, क्षणद्वयं शून्यता भित्तिकासु संव्याप्ता। अहं निरपराधं सहसा वेत्रेण प्रताडितस्य वृक्षस्योदासीना शाखा इव स्वमनुभवन्नासम्। मनुत अनेन प्रताडनेन वृक्षस्य सर्वाणि पत्राणि पतितानि नग्नाश्च शाखाः अधोमुख्यस्तानि गणयन्ति। मम मनः क्वाप्यन्यत्रासीदहं चान्यत्र। अहं शिरो नमयित्वा उपविष्ट आसम्। उपरि द्रष्टुं मम इच्छापि नासीत्। प्रधानाध्यापको मत्तो ध्यानं निवार्य पुनः पाठयितुं प्रारभत्। अलम्, अहं मनस्येव मनसि तस्यैतत्कार्यस्य निन्दां कुर्वन्नासम्।

किंचित्कालानन्तरमेव घटिकया सार्द्धपंचवादनस्य ध्वनिः कृतः। मह्यं भासतेस्म मम श्वासावरोध एव भविता। अहं निश्चलो निस्तब्ध एवोपविष्टः। नेत्रे उद्घाटिते परं ताभ्यां न किञ्चिदवलोक्यते स्म। प्रधानाध्यापकस्य पाठनध्वनिरप्यधुना कर्णयोः प्रवेशं न प्राप्नोति स्म। अभिलाषासीदहं रोदेयम्, स्वदशायामुच्चैः रोदेयम्। परं रोदनमप्यस्यामवस्थायामसम्भवमेवासीत्। भयङ्करी वेदना समजायत। पर्वतशिखराणि भग्नानि मम शिरसि पतन्त आसन्। न ज्ञायते कियत्कालमहमेतस्यामेवावस्थायां समुपविष्टः।

अन्ते च प्रधानाध्यापक एव किंचिद् व्यंग्यपूर्णं प्रवदन् मम शिरसि हस्तं स्थापितवान् आम् अधुनोत्तिष्ठ देशभक्त। अहं शनैः शनैर्बहिरागतः। इयत्या मन्दगत्या यदन्ये विद्यार्थिनो मुख्यद्वारे सम्प्राप्ता मयावलोकिताः मया पुस्तककन्था स्कन्धावलम्बिता गृहं प्रति च प्रचलितः।

ब्रह्मपुरी, जयपुरम्

# देवानां शक्तिपरीक्षणम्

❑ श्रीमती आराधना धर्माधिकारी

पुरा किल देवासुरसंग्रामे विजयिनो देवाः सुधर्माया-मुपविश्य परस्परं चर्चां चक्रुः। ते स्वं स्वं पराक्रम-महमहमिकया अवर्णयन्। अग्निदेवोऽब्रवीत्-अहं क्षणमात्रेण सर्वं भस्मीकर्तुं समर्थोऽस्मि। कस्यनाम असुरस्य मत्समक्षं स्थातुं शक्तिः। वायुदेवोऽब्रवीत्। अहं महान्तमपि वृक्ष क्षणेन पातयितुं समर्थः को नाम असुरः मत्समक्षं तिष्ठेत् अत्रान्तरे गगने महत्तेजोमयां किचिज्ज्योतिः प्रादुरभवत्। तत्तेजसा सर्वेषामपि चक्षूंषि निमीलितानि। देवराज इन्द्रो अग्निदेवम-ब्रवीत्-भवांस्तु क्षणमात्रेण सर्वं भस्मीकर्तुं समर्थः। गम्यता ज्ञायतां किमिदमिति। तदाज्ञया अग्निदेवो गतः। कियद्दूरं गते ध्वनिरभूत् कस्त्वं किं वाञ्छसि, काते शक्तिः। अग्निदेवोऽ-ब्रवीत् अग्निदेवोऽहम् भस्मीकरणे मे शक्तिः तवाग्रे यत्तृणं वर्तते तद्भस्मीकुरु इति ध्वनिरभूत्। तेन महत्प्रयतितं परं न तद् भस्मीभूतम्। परावृत्य स देवसभायामागत्य स्वस्थाने उपविष्टः सर्वैः पृष्टोऽपि स न किंचिदप्यवदत् अधोमुख एवातिष्ठत्। ततो देवराजो वायुदेवं प्रैषयत्। तस्यापि सैव गतिरभवत्। अन्ते देवा देवराजमेव प्रार्थितवन्तः। महाराज ! नात्रास्माकं गतिः, भवानेन ज्ञातुं गच्छ सति संकटे वयं साहाय्यं विधास्यामः। देवराजः स्वयमेव गतः परं किंचिदं दूरं गते ज्योतिर्विलुप्तम-भवत्। देवराजस्तु त त्रैव विस्मित आतिष्ठत्। क्षणेनैव तत्र योगमाया प्रकटिता सा इन्द्रमवदत् वत्स किं विस्मितस्तिष्ठसि। स्वयं सर्वशक्तिमान् परमेश्वरस्तवाग्रे आसीत्। अग्निवायव्वोः स्थितिस्त्वयाऽवलोकिता। तौ संमुखस्थं तृणमपि दग्धुं दूरे प्रक्षेप्तुं वा समर्थौ नाभूताम्। सर्वशक्तिमान् यावतीं शक्तिं प्रददाति तावदेव कार्यं भवता कर्तुं शक्यते। वृथाभिमानो न कार्यः, एतदेव बोधनार्थं स आगतः। भवांस्तु देवराजः न तेऽपमान उचित अतएव स विलुप्तः गच्छ देवानवबोधय, असुराः पुनः संहता। आक्रमणं न कुर्युरिति सज्जा भवत।

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्

# सूक्ति-सुधा

❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**गुणिनां सङ्गमं प्राप्य निर्गुणोऽपि गुणी भवेत्।**
**गुणी निर्गुणसंसर्गात् क्षयं गच्छति काकवत्।।**

– गुणी मनुष्यों की संगति प्राप्त कर निर्गुण मनुष्य भी गुणी हो जाता है। निर्गुण मनुष्यों के संसर्ग से गुणी मनुष्य भी काक के समान क्षय को प्राप्त होता है।

**साधुसङ्गमनासाद्य यो नरः मुक्त्यालयं व्रजेत्।**
**स चान्धः प्रचलन्मार्गे कथं मेरुं समारुहेत्।।**

–जो मनुष्य साधुजनों की संगति किये बिना ही मोक्ष को जाना चाहता है, वह अन्ध पुरुष स्खलित मार्ग से मेरु पर कैसे चढ़ सकता है।

**विषानलमहासर्पव्याघ्रसङ्गकृतो वरम्।**
**न च दुर्जनसंसर्गात् जीवितव्यं धनादिकम्।।**

– विष, अग्नि, महासर्प और व्याघ्र का संग करना श्रेष्ठ है, पर दुर्जन के संसर्ग से जीवित रहना और धनादि प्राप्त करना श्रेष्ठ नहीं है।

**चौरसंसर्गतो यद्वद् वधबन्धनादिकं श्रयेत्।**
**तद्वन्नीचप्रसङ्गेन पापक्लेशवधादिकम्।।**

– जैसे चोर के संसर्ग से मनुष्य वध, बन्धन आदि को प्राप्त होता है, वैसे ही निम्न स्तरीय व्यक्ति के संसर्ग से पाप, क्लेश, वध आदि को प्राप्त होता है।

**वैराग्यत्वमनासाद्य दीक्षादानं करोति यः।**
**तस्य जन्म वृथा हि स्यादजाकण्ठस्तनाविव।।**

– जो वैराग्य भाव को प्राप्त किये बिना ही दीक्षा को (साधु) ग्रहण करता है, उसका जन्म बकरी के गले में लटकते हुये स्तनो के समान ही व्यर्थ है।

22, श्रीजीनगर, दुर्गापुरा, जयपुर

# संस्कृतसेवकानां साम्प्रतिकं कर्तव्यम्

❑ महामहोपाध्याय देवर्षिकलानाथशास्त्री

अस्माकमुपास्या गीर्वाणवाणी सेयं विश्वभाषासु प्राचीनतमाऽस्तीति विश्वविदितं तथ्यम्। सहस्राब्दी-भ्योऽस्यां वाङ्मयसृष्टिरविरता प्रवर्तते, नूतनं साहित्यं सृज्यते, अत: सेयं वैदिकी उषा इव ''पुराणी युवति'' रित्यपि वयमनुदिनं ब्रूम:। विश्वस्य बह्व्यो भाषा (उपभाषा वा) नवीनेऽस्मिन् वैश्वीकरणयुगे मृता:, विलुप्ता, विलुप्यमानाश्च सन्तीति पठितं स्यात् सर्वै: समाचारपत्रेषु। वैश्वीकरणस्य परिणतिरियमेव यद्विश्व-प्रसृता बहुजनपरिगृहीताश्च भाषा व्यवह्रियन्ते, अल्पीयस्यो भाषा विलुप्यन्ते। संस्कृतभाषा सेयं न बहुजनपरिगृहीता मातृभाषारूपेण, किन्तु विश्वस्य सर्वेषु देशेषु प्राच्यभाषारूपेणाधीयते, समाद्रियते च। अन्तर्जालपुटे (इंटरनेट) संस्कृतस्य विपुल-वाङ्मयमन्वेष्टुं शक्यते, संस्कृते वेबमैगजीनाख्या: पत्रिका: प्रकाश्यन्ते। भारतजनगणनानुसारं प्राय: पञ्चाशल्लक्षजनैर्मातृभाषारूपेणापि सेयमुदलेखि। अस्यामाकाशवाणीतो दूरदर्शनतश्चापि प्रत्यहं वार्तापत्राणि (समाचारा:) प्रसार्यन्ते।

गतेषु वर्षेषु देववाण्या: कृतेऽनुकूला: कतिपये समाचारा: श्रुता:, प्रतिकूलाश्च कतिपये इति स्मरेयु: संस्कृत-सेवका:। भारतस्य राज्येष्वेकेन राज्येन द्वितीयराजभाषापदमस्यै प्रदत्तमिति श्रुत्वा प्रसीदेयु: संस्तृतहितैषिण:। उत्तराखण्डराज्येन हिन्द्या राजभाषा-त्वं संस्कृतस्य च द्वितीय-राजभाषात्वं घोषितम् (2010)। बेंगलूरुनगरे विश्वसंस्कृतपुस्तकमेलाया आयोजनमभूद (जनवरी 2011) यत्रादृष्टपूर्व: संस्कृतसमूह: सुमहत्यां संख्यायामुपातिष्ठत, कोटिशो मुद्रामूल्यानि सर्वाण्यपि पुस्तकानि दिवसत्रय एव विक्रीतानीत्युत्साहप्रदोऽनुभवोऽसूच्यत प्रकाशक-वर्गेण। एवांविधेषु सङ्गमेषु संस्कृत-सेवकानामेक-सूत्रताया, बन्धुत्वभावनायाश्च यद् बलं प्रत्यक्षीक्रियते तेनैवास्या भविष्यदुज्ज्वलं भूयादिति कामयामहे। अन्यथा विगतेषु कालखण्डेषु तादृशी स्थितिरपि देशेऽस्मिन् संस्कृतपण्डितैर्दृष्टाऽभूद्यत्प्रान्तविशेष-स्य व्यक्तिविशेषस्य वोत्कृष्टतरख्यापनायात्मप्रशंसायै अपरस्यच च खण्डनाय पण्डितपुङ्गवा विभृम्भन्ते स्म। ''चिन्त्यमिदम्,'' ''अनुचितमिदम्'', ''आस्माकीन: पक्ष एवं साधु:'' इत्यादि घोषयन्त: पण्डिता: ''आत्मोदय: परज्यानिर्द्वयं नीतिरितीय-तीति'' माघवचोऽनुसरन्तो दृश्यन्ते स्म। अतो 'व्यूहरचना', विकत्थनं, परापवाद इत्यादय: स्थितयो बहुधा दृश्यन्ते स्मेति स्मरेयुस्तदानीन्तनानि दृश्यानि दृष्टवन्तो जना:। अत एवैकदा ''तन्मनो मे दुनोति'' इति समस्याया: पूर्तये समधिविष्टायां कविसभायां मयेयं समस्या पूरिताऽभूदनेन पद्येन -

**''भगवति ! न हि दूये यद् युगेस्मिन्नवीने**
**प्रविरलविषया त्वं जायसे देववाणि।**
**करतलगणनीयेष्वेषु ते पण्डितेषूद्भवति यदि**
**विरोधस्तन्मनो मे दुनोति।।''**

अद्य नवीने युगे यदाऽन्यभाषाभक्ता: प्रबलायन्ते

तदा संस्कृतसेवकैः, सर्वविधान् मतभेदान् विस्मार्य भ्रातृत्वस्य, एकसूत्रतायाश्चाभियानं प्रारभ्येत येन देशेऽस्मिन्नस्माकं भाषाऽपि सर्वोच्चमादरं लभेत, वयमपि मूर्धन्यं स्थानमधितिष्ठेम इति युगस्यास्य सुमहत्यपेक्षेति किं नाऽनुभूयते भवद्भिः? एवंविधानि सद्भावस्यैकसूत्रतायाश्च दृश्यानि यदा दृश्यन्ते यथा गतेषु वर्षेषु बेंगलूरुनगरे, सोमनाथ संस्कृतविश्व-विद्यालयेनाऽऽयोजिते (दिसं. 2010) संस्कृतमहा-कुम्भाख्ये विद्वत्सङ्गमेऽन्येष्ववसरेषु च दृष्टान्यस्मा-भिस्तदा काचिदाशा जागरिता यत् संस्कृतस्य तन्मूर्धन्यं स्थानं न स्खलेद्यदस्मिन् देशे सहस्राब्दी-भ्योऽक्षुण्णमभूत्।

एतद्विपरीतं बहुषु स्थलेषु संस्कृतस्य यत् स्थानं पूर्वमासीत्, तस्मात् स्थानात् च्यावितेयं भाषेति जानीयुस्ते संस्कृतसेवका यैर्दृष्टं यत् केन्द्रीय-माध्यमिकशिक्षामण्डलस्य पाठ्यचर्यायां यस्मिन् विषयसमूहे संस्कृतमासीत्, येन कारणेन च बहवश्छात्राः संस्कृतविषयं गृह्णन्ति स्म, तस्मात् समूहादपसार्य वैदेशिकभाषासमूहस्य विकल्पे सेयं पश्चात्पदीकृता। केन्द्रीयप्राशासनिक-प्रतियोगिता-परीक्षासु (आई.ए.एस. इत्यादिषु) संस्कृतविषय-माददानानां प्रतियोगिनां सुमहती संख्याऽभूत्, विषयेऽस्मिन्नुत्कृष्टा अङ्का लभ्यन्त इति धिया। कतिपयेऽधिकारिणस्तु संस्कृतमाध्यमेनैव आई.ए.एस. परीक्षामुदतीतरन्निति सुप्रथितमभूद् यदा 1985 ई. वर्षे श्रीशङ्करनारायण पाणिग्रही संस्कृत-मादायास्मै पदाय चितोऽभूत्। सम्प्रति नूतनैव काचन प्रक्रिया केन्द्रीय प्रतियोगिता-परीक्षाणां कृते "अभिक्षमतापरीक्षण" (एप्टिट्यूड टेस्ट) माध्यमेन निर्धारिताऽस्ति यस्यां संस्कृतहिन्द्यादिभारतीयभाषाः पश्चात्पदीकृताः, आंग्लभाषायाः प्राबल्यं तु यथायथं तिष्ठेदेव। अनेन संस्कृतार्थिनां बहवोऽवसरा विलुप्ताः। राजस्थानादिराज्यानां प्रशासकीयप्रतियोगिताभ्योऽपि संस्कृतभाषा बहिष्कृताऽस्ति। इत्थं भारतीयभाषाणा-मधिकाररक्षयाय निभृतं चेष्टमानाः सन्ति कतिपये-ऽधिकारमूर्ध्नि स्थिताश्चाणक्या इति विदाङ्कुर्वन्तु बन्धवः।

एवंविधानां विघ्नानां निवारणं तदैव सम्भवति यदा सर्वे संस्कृतसेवकास्तेनैव सद्भावेन, भ्रातृभावेनैक्येन च कटिबद्धाः स्युर्यद्गते वर्षद्वये बहुधा दृष्टमस्माभिः। समयोऽयमागतो यदा संस्कृतस्नेहिनो महाभारतीयं वाक्यमिदं स्मरेयुः "परस्परविरोधे तु वयं पञ्च शतं च ते। अन्यैः सह विरोधे तु वयं पञ्चाधिकं शतम्।"

सर्वस्यास्य निवेदनस्य तात्पर्यमिदमेव यदस्मा-कमाराध्याया गीर्वाणवाण्या महिमा नूनमक्षुण्णः स्थास्यतीत्यस्या आशायाः प्रमाणानि दृष्टान्यस्मा-भिर्गतेषु वर्षेषु किन्तु निभृतं चेष्टमानैर्भारतीयभाषा-न्यक्कारे आधुनिकत्वमनुभवद्भिः पाश्चात्यभाषा-स्वीकारे देशस्योन्नतिं पश्यद्भिः कतिपयैरुच्च-पदस्थैर्यदि संस्कृतविरोधिनो निर्णयाः क्रियन्ते तर्हि तेषां विरोधाय संस्कृतज्ञा ऐक्यं स्वीकृत्य समुत्तिष्ठेयुरित्यद्यतनी अपेक्षा।

एवंविधानामपेक्षाणां कृते जागरूकाः सन्ति संस्कृतसेविन इत्याशास्महे। देशे 15 संस्कृत-विश्वविद्यालयाः सन्ति, राष्ट्रीयसंस्कृत संस्थानं

(यदात्मानं ''राष्ट्रिय'' पदेनाभिदधाति) मानितविश्व-विद्यालयोऽस्ति यस्य दशाधिक परिसरेषु संस्कृत-शिक्षाध्वजः सर्वोच्चत्वेन दोधूयते। अनेन हि शैक्षणिकान्यायोजनान्यपि प्रत्यब्दं क्रियन्ते, प्रशस्यानि प्रकाशनान्यपि। संस्थानेनानेन जयपुरे संस्कृत-परम्पराया गौरवभूतस्य नूतनसंस्कृतसर्जनेतिहासे युगप्रवर्तकस्य ''मञ्जुनाथ'' काव्यनाम्ना प्रसिद्धस्य कविशिरोमणि देवर्षिभट्ट श्रीमथुरानाथशास्त्रिणः समग्ररचनानां ग्रन्थावलिरपि प्रकाशिताऽस्ति यस्यां सुविशालं भागपञ्चकं प्रकाशितचरम्।

अन्यैरपि संस्कृतसेविसंस्थानैः संस्कृत-वाङ्मयस्य साधीयसी सेवा विधीयमानाऽस्ति, 'संस्कृतभारती' प्रभृतिसंस्थाभिः संस्कृतभाषा-प्रचारस्य प्रशस्यं कृत्यं क्रियमाणमस्ति। भूयस्यां संख्यायां संस्कृतपत्रिकाः प्रकाश्यन्ते, प्रत्यब्दं भारतराष्ट्रपतिभिः संस्कृतविद्वांसः संमान्यन्ते, बहवः पुरस्काराः संस्कृतसर्जकाणां कृते विविधाभिः संस्कृतअकादमीभिः साहित्यप्रोत्साहकसंस्थाभिश्च प्रदीयन्ते। अतो न कुत्रापि नैराश्यस्यावकाशः संस्कृतपण्डितानां कृते यदयं देशो न तानाद्रियते। तेषामधुनेदं कर्तव्यं यत्ते सर्वात्मना भाषाया अस्याः प्रसाराय, छात्राणां भाषायामस्यामधिकारसर्जनाय, भाषाया अस्याः साहित्यसंवर्धनाय प्रयतेरन्। भाषाया अस्या या प्रौढिरपक्षीयते सा साध्यवसायं पुनरानाय्या स्यात्। साहित्यसर्जने नूत्ना दिशाः परिदृश्यन्ते तत्तु हर्षावहं, किन्तु व्याकरणस्खलनानि यानि परिदृश्यन्ते बहुसंख्याकेषु लेखकेषु, तत् खेदावहम्।

सर्वेषामस्माकमिदमेव ''दायित्वं'' यदुपरि सूचितानां स्थितीनां समुद्धाराय सदृढसंकल्पं प्रयतेमहि। ये खलु भाषाया अस्या अध्यापनस्य दायित्वं वहन्ति तान् साञ्जलिबन्धं प्रार्थयामो यदस्या व्याकरणे साहित्ये च समनोयोगमवगाहनं विधायास्याः प्रयोगेऽधिकारमवाप्नुयुः, तेन च तेषां शिष्या अपि निश्चप्रचं भाषापरिज्ञाने दक्षाः स्युः।

**सी-8, पृथ्वीराज रोड, सी-स्कीम, जयपुर**

## निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291/8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

नाम........................................ ...........पुत्र/पुत्री श्री............................भवन संख्या...........

गली/ मोहल्ला/कॉलोनी.........................................वाया/पोस्ट ऑफिस....................................

तहसील................................जिला.................................राज्य.....................................

देश..................पिन...........................................दूरभाष..........................................

मोबाईल नं...........................ईमेल.................................................................

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014

ई–मेल – sanskritbharti09@gmail.com

# शास्त्रभेदेन शब्दभेदः

❑ योगेश्वरस्वामी
( नव्यव्याकरणाचार्यः, वेदांताचार्यः, नव्यन्यायाचार्यः, पी.एच.डी. )

जगदिदं शब्दब्रह्मणः विवर्तनमिति मतं प्रायशः सर्वैः स्वीक्रियते। बहुष्वपि शास्त्रेषु शब्दस्य ब्रह्ममयत्वं स्वीकृतम्। सर्वैश्च शब्दब्रह्मणः स्वरूपविषये महती चर्चा विहिता। उक्तञ्च हरिणा–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**

सुविदितमेव यत् कस्यापि वस्तुनः सिद्धिः प्रमाणाधीनैव भवति। अत एव सर्वैः शास्त्रकृद्भिः महर्षिभिः प्रमाणान्येव सुनिरूपितानि। प्रमाणेष्वपि शब्दप्रमाणं शाब्दबोधं वाऽऽदाय शास्त्रे विचारणा क्रियते। शब्दसाधुत्वप्रक्रियायामस्ति च मूर्धाभिषिक्तं व्याकरणम्। उक्तञ्च हरिणा–

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोधं शब्दानां नास्ति व्याकरणादृते।।**

अपि चार्थप्रक्रियायाम्– वैयाकरणैः सह नैरुक्तनैयायिकमीमांसकालङ्कारिकाणामपि प्रवेशोऽस्ति। व्याकरणशास्त्रादन्यानि शास्त्राणि शास्त्रकारा अपि भाषाया अर्थचिन्तनं शाब्दबोधव्यवस्थाञ्च स्वस्वशास्त्रे विचारयन्त्येव। स च पक्षविपक्षगतविविधवादविवाद–प्रवाहो न केवलं संस्कृतं भारतीयशास्त्रीयपरम्परां वा प्रोज्जीवयति किन्तु प्रतिष्ठापयति पदे पदे गौरवास्पदे च।

तत्र भाषायाः शब्दार्थस्य च स्वरूपं किम्? प्रारम्भः कदाऽभूत्, कथमभूत् इत्यादिप्रश्नेषु तद्वैज्ञानिकानां विद्यमानासु अनेकपरिकल्पनासु नाद्यावधि यथा इदम् इत्थंरूपेणेत्यत्र ऐकमत्यं जातम्। एवञ्च सर्वोऽपि व्यवहारो भाषानिबन्धनः, भाषा च शब्दनिबन्धना। अत एव लोके निखिलोऽपि व्यवहारः शब्देनानुविद्ध इव प्रतीयते। नास्ति सोऽर्थः य इह कदाचित् क्वचित् कथञ्चित् शब्देन वियुज्यते। तदुक्तं हरिणा –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**

अतश्च यदि शब्दः प्रमाणं नैव स्यात् तर्हि अन्ततोगत्वा लोकानां व्यवहारा एव दिवङ्गता भवेयुः। पुनश्च प्रोक्तं महाभाष्यकृता– 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।' अतोऽस्ति हि शब्दः तात्विकः। शब्दविषयमिममाधृत्य एवायं लेखः, अतः शब्दाधिगतं किञ्चित् समीक्ष्यते।

स शब्दः कीदृशः ? यथा च– गौरित्यत्र कः शब्दः ? इत्यस्मिन् प्रसङ्गे भगवान् पतञ्जलिरप्याह– 'येनोच्चारिते सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः।' अथवा– 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' इत्युच्यते इति। स च शब्दः शास्त्रभेदेन बहुशः प्रविभज्यते। तद्यथा–

**शब्दो द्विविधः –**

1. अबुद्धिहेतुकः मेघादिशब्दः।
2. बुद्धिहेतुकः

**तत्र बुद्धिहेतुको द्विविधः –**

1. स्वाभाविकः – तत्र स्वाभाविको वर्णविशेषान–भिव्यञ्जको हसितरुदितादिरूपः प्राणिमात्रसाधारणः।
2. काल्पनिकः

**तत्र काल्पनिकोऽपि त्रिविधः –**

1. वाद्यादिशब्दः – भेरीशब्दादिर्वाद्यादिशब्दः।
2. गीतिरूपः – माधवादिरागाभिव्यञ्जकनिषादा–दिस्वरशब्दो गीतिरूपः।

3. वर्णात्मक:- ध्वनिविशेषसहकृत-कण्ठताल्वाद्यभिघातजन्यश्च वर्णात्मक:। स्वाभाविककाल्पनिकयोर्ध्वनेरूपकारकत्वाद् ध्वन्यात्मकता।

**अन्यत्र चेत्थं विभाग उक्त: -**

**नैयानिकानां मते[1] शब्दो द्विविध: -**

1. ध्वन्यात्मक: - भेरीमृदङ्गादौ प्रसिद्ध:।

2. वर्णात्मक: - संस्कृतभाषादिरूप: शब्द:।

**ध्वन्यात्मकवर्णात्मकौ द्विविधावपि प्रत्येकं त्रिविधौ-**

1. संयोगज: 2. विभागज: 3. शब्दज:

**तत्र संयोगजोऽपि द्विविध: -**

1. संयोगजध्वन्यात्मक: भेर्यामभिहन्यमानायां भेरीदण्डसंयोगाद् ध्वन्यात्मक:।

2. संयोगजवर्णात्मक: वायुकण्ठताल्वादिसंयोगाद् वर्णात्मक:।

**तत्र विभागजोऽपि द्विविध: -**

1. विभागजध्वन्यात्मक: वंशे पाट्यमाने दलद्वय-विभागाच्चटचटात्मको ध्वन्यात्मक:।

2. विभागजवर्णात्मक: - ओष्ठद्वयविभागाद् वर्णात्मक:।

**तत्र शब्दजोऽपि द्विविध: -**

1. शब्दजध्वन्यात्मक: भेरीशब्दादिवाद्यादिशब्दे द्वितीयशब्दादिचरमशब्दान्त:।

2. शब्दजवर्णात्मक: कण्ठताल्वाद्यभिघातजन्ये द्वितीयशब्दादिचरमशब्दान्त:।

**तत्र पुनरपि वर्णात्मको द्विविध: -**

1. वायुकण्ठसंयोगेन जायमान: प्रथम:।

2. ओष्ठद्वयविभागेन जायमानो द्वितीय:।

3. शब्दच्छब्दान्तरं तृतीय:।

**सांख्यमते शब्दो द्विविध: -**

1. स्थूलशब्द: - इन्द्रियग्राह्य: स्थूलशब्द:।

2. सूक्ष्मशब्द: - इन्द्रियविषयमतिवर्तमानमाकाशतन्मात्रमेव सूक्ष्मशब्द:।

**काव्यप्रकाशकारमते 2 शब्दो द्विविध: -**

1. निरर्थक: - करतलसंयोगजन्य:।

2. सार्थक:

**तत्र सार्थक: शब्दस्त्रिविध: -**

1. वाचक: 2. लाक्षणिक: 3. व्यञ्जक:

**कणादसूत्रभाष्ये शब्दो द्विविध: -**

1. वर्णलक्षण: - अकारादिर्वर्णलक्षण:

2. अवर्णलक्षण: - ध्वनिलक्षण: चाऽवर्णलक्षण:।

अत्र पाठान्तरं संख्यादिनिमित्तोऽवर्णलक्षण इति।

**वर्णात्मक: पुनर्द्विविध: -**

1. सार्थक:

2. निरर्थक: - 'कचटतप' इत्यादि।

**तत्र सार्थक: शब्दस्त्रिविध: -**

1. प्रकृति: - राम, श्याम, घनश्याम इत्यादय:।

2. प्रत्यय: - सु, औ, जस्, तिङ्, अञ् इत्यादय:।

3. निपात: - च एवम्, अ, इ, पुरा, कुत्र, हन्त इत्यादय:।

**पुनरपि वर्णात्मको द्विविध: -**

1. प्रमाणशब्द: - शब्दप्रमितिकरणज्ञानविषय: शब्द इति। तत्र प्रमाणशब्द आप्तोपदेश:। अथवा प्रयोगहेतुभूतार्थ-तत्वज्ञानजन्य: शब्द:।

---

1 शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनि:।। कण्ठसंयोगादिजन्या वर्णास्ते कादयो मता:। (165-164-कारिका-न्यायसिद्धान्तमुक्तावली)

2 काव्यप्रकाश: ) - सूत्रम् ( 6-5-

2. अप्रमाणशब्दः– 'वह्निना सिञ्चेत्' गौरश्वः पुरुषो हस्तीत्यादिरूप इति। अत्र शब्दो न प्रमाणम्।

**प्रमाणशब्दोऽपि द्विविधः –**

1. लौकिकः 2. वैदिकः

**तत्राद्यो लौकिकः शब्दः पुनः त्रिविधः –**

1. विधिः – 'पाकं कुर्यात्' इत्यादिः।

2. निषेधः – 'इदमनिष्टं न कुर्यात्' इत्यादिः।

3. अर्थवादः – 'अयं ब्राह्मणः स्वमहिम्ना सर्वं जगत् पवित्रं करोति' इत्यादिः स्वयमूह्यः।

**वैदिकः शब्दः पञ्चविधः –**

1. विविधः 2. मन्त्रः 3. नामधेयम्
4. निषेधः 5. अर्थवादः :

तत्र लौकिकः शब्द आप्तोक्त एवं प्रमाणभूतः। वैदिकस्तु सर्व एव प्रमाणभूतः। परमाप्तेन भगवता प्रणीतत्वात्।

**प्रकारान्तरेणापि प्रमाणशब्दो द्विविधः –**

1. प्रमाणशब्दः – आप्तोपदेशशब्दः।

2. अप्रमाणशब्दः – 'वह्निना सिञ्चेत्' गौरश्वः पुरुषो हस्तीत्यादिरूप इति। अत्र शब्दो न प्रमाणम्।

**तत्र प्रमाणशब्दो द्विविधः –**

1. दृष्टार्थः – 'घटोऽस्ति' इत्यादिरूपः।

अदृष्टार्थः – 'स्वर्गनरकापूर्वादिशब्दः' इति।

**अत्र मध्वमतानुयायिमते शब्दो द्विविधः –**

1. प्रमाणशब्दः – निर्दोषत्वादागम इत्युच्यते।

2. अप्रमाणशब्दः – दोषत्वादागमाभास इत्युच्यते।

तदुक्तम्–

**आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च।**
**ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्।।**
**मूलरामायणं चैव पुराणं चैतदात्मकम्।**
**ये चानुयायिनस्तेषां सर्वे ते च सदागमाः।।**
**दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः।** [3]

सत्यपि स्फोटे वर्णातिरिक्तत्त्वेऽसौ वर्णात्मकध्वनित एवाऽभिव्यक्तो भवति। यद्यपि स्फोटो नित्यो निरंशोऽविभाज्यश्च[4] तथापि शब्दानां स्वरूपज्ञानोपायतया कृताः सन्ति स्फोटस्याऽष्टविधाः काल्पनिका विभागाः। यथा –

**वर्णस्फोटौ द्विविधौ –**

1. वर्णजातिस्फोटः 2. वर्णव्यक्तिस्फोटः

**पदस्फोटस्त्रिविधः –**

1. पदजातिस्फोटः 2. सखण्डपदव्यक्तिस्फोटः

3. अखण्डपदव्यक्तिस्फोटः

**वाक्यस्फोटोऽपि त्रिविधः –**

1. वाक्यजातिस्फोटः

2. सखण्डवाक्यव्यक्तिस्फोटः

3. अखण्डवाक्यव्यक्तिस्फोटः

एवञ्च सम्मेलनेनाऽष्टविधः स्फोटः सम्पद्यते।

वस्तुतस्तु वास्तविकं वाचकत्वं तु प्रकृतिप्रत्यय-समुच्चयरूपत्वेन सम्मते पदे वाक्ये वा भवति व्यवहारे तत एवार्थज्ञानात्। तत्रापि द्विविधा ह्याचार्याणां प्रवृत्तिर्दृश्यते यथा –

1. पदस्फोटसमर्थिका 2. वाक्यस्फोटसमर्थिका

तत्राद्यपक्षे हि प्रकृतिप्रत्ययसमुदायरूपस्य पदस्य वास्तविकं वाचकत्वं समर्थ्यते।

---

3. न्यायकोषः 867 पृ.–भीमाचार्यः –
4. महाभाष्यम् स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथं–7 भेर्याघातवत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः। ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः। महाभाष्यम् (67–1–1)–

द्वितीयपक्षे तु पदानामपि काल्पनिकत्वं विभाव्य वाक्यमात्रस्य वास्तविकं वाचकत्वमनुमन्यते। अधिकांशविपश्चितस्तु द्वितीयमेव पक्षं श्रद्दधति वाक्य-स्यैव व्यवहारेऽर्थबोधकत्वात्।

वाक्यस्य स्फोटत्वे ''कृत्तद्धितसमासाश्च''[5] इति सूत्रं प्रमाणम्। सूत्रमिदं नियमार्थम्, भाष्यप्रामाण्यात्। यद्यपि-'विधिनियमसम्भवे विधिरेव ज्यायान्' इति वर्त्तते कश्चन प्रामाणिको नियमः, तथापि भाष्यप्रामाण्यादत्र नियमार्थत्वमेवाङ्गीचक्रुर्वैयाकरणाः, 'यथोत्तरं मुनीनां प्रामाण्यात्'। एवञ्च समासस्यैव प्रातिपदिकत्वाद् वाक्यस्य प्रातिपदिकत्वं व्यावृत्तं भवति। तत्र केवलस्य समासस्यैव प्रातिपदिकत्वे स्वीकृते रामादिशब्दानां समासानां कथङ्कारं प्रातिपदिकत्वं स्यादिति हेतोर्नियमाकार ईदृशः क्रियते - 'पूर्वोत्तरपदघटितस्य प्रातिपदिकसंज्ञा चेत्, तर्हि समासस्यैव' इति। तेन नियमानाक्रान्तत्वाद् रामादिशब्दानां प्रातिपदिकत्वं सिद्ध्यति।

इत्थञ्च वाक्यस्य या प्रातिपदिकसंज्ञा व्यावर्त्त्यते नियमेन तदेव प्रमाणं वाक्यस्य स्फोटत्वे इति प्रतिभाति।

स्फोटस्य द्विविधा व्युत्पत्तिरङ्गीक्रियते। यथा-

1. स्फुटति प्रकाशते, अवगम्यतेऽर्थोऽनेनास्माद्वेति व्युत्पत्त्या-अर्थविषयकोपस्थिति-जनकतावच्छेदकी-भूतशक्तिमत्त्वं स्फोटत्वमिति भावः।

2. स्फुट्यते अभिव्यज्ज्यते वर्णैरिति स्फोट इति व्युत्पत्त्या वैखरीध्वनीनां व्यञ्जकत्वं स्फोटस्य च व्यङ्ग्यतेति सिद्ध्यति।

**शब्दश्चतुर्विधः -**

1. रूढः - अवयवार्थमनपेक्ष्य समुदायशक्ति-मात्रेणार्थबोधकत्वं रूढत्वम्-रथन्तरमित्यादौ।

2. योगरूढः - अवयवार्थसंवलितसमुदायशक्ति-मात्रेणार्थबोधकत्वं योगरूढत्वम्-पङ्कजमित्यत्र।

3. यौगिकः - अवयवशक्त्यैवार्थबोधकत्वं यौगिकत्वम् - पाचिका, पाठिकेत्यादौ।

4. यौगिकरूढः - अवयवशक्त्या समुदायशक्त्या चाऽर्थबोधकत्वं यौगिकरूढत्वम्-मण्डपान-कर्तृपरोऽपि गृहविशेषपरोऽपि मण्डपशब्द उदाहरणमिति विवेकः[6]।

**नैयायिकमते[7] रूढस्त्रिविधः -**

1. नैमित्तिकः - गौः गवयः इत्यादयः।

2. पारिभाषिकः - देवदत्तः, चैत्रः इत्यादयः।

3. औपाधिकः - आकाशः पशुरित्यादयः।

लोके शास्त्रे वा यो यः शब्द उच्चार्यते स स्वातिरिक्तं स्वनिष्ठवृत्तिज्ञानाधीनोपस्थिति-विशेष्यं कमप्यर्थमुप-स्थाप्य क्षीणबलत्वात् स्वयं कार्यान्वयं न लभते, किन्तु स उच्चार्यमाणः शब्दो यमर्थं प्रत्याययति, स एवार्थः कार्यान्वयं लभते।

अनया विधया शब्दः संक्षेपेण निरूप्य किञ्चित् समीक्षितः। मरीच्यादय ऋषयोऽपि पूर्वकल्पस्य सृष्ट्यादिप्रक्रियां शब्दप्रमाणेनैवाजानन् अतोऽस्त्येव शब्दप्रमाण वैदिकत्वम्। शब्दः खल्वपि **'नामरूपे व्याकरवाणि'** इति श्रुत्या शब्दरूपेण अर्थरूपेण अर्थात् संसाररूपेण विवर्तते। तस्या एव भगवत्याः श्रुत्याः प्रामाण्याद् ब्रह्मणः विवर्तपक्षे जगतः मूलस्य ब्रह्मणः शब्दरूपत्वे अर्थरूपत्वे वा विनिगमनाविरहात् तस्य शब्दरूपात्मकमेव सिध्यति। एवं रीत्या शब्दः लेखेऽस्मिन् दिङ्मात्रेण विमृष्ट इति।।

5 अष्टाध्यायी (46-2-1) -

6. परमलघुमञ्जूषा समासादिवृत्यर्थनिरूपणे-

7. शब्दपरिच्छेदः 19 - श्लोकः -

**स्वामिनारायणसंस्कृतविद्याप्रतिष्ठानम्**
**सरधारः - गुजरातम्**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## भरतवंशीयो रन्तिदेवः

सुप्रसिद्धस्य दुष्यन्तनृपतेः पुत्रः चक्रवर्ती सम्राट् भरत आसीत्। सः दिग्विजये किरातहूणान् यवनानांध्रान् कङ्कान् खशाञ्छकांश्च म्लेच्छनृपान् रणे जघान। तस्मिन्नेव कुले सङ्कृतेः पुत्रो रन्तिदेवो बभूव। एषः चन्द्रनगरे राज्यं प्रकुर्वाणः सदा परोपकारनिरतश्चासीत्। तस्य शासने प्रजाजनाः सुखिनः निरामयाः दुःखरहिताश्चासन्।

एकस्मिन् वर्षे तस्य राज्ये घोरा अनावृष्टिर्जाता। अतः सर्वाणि क्षेत्राणि तृणधान्यशून्यानि बभूवुः। जलाशया अपि जलरहिता जाताः। क्षुधातृषार्ता प्रजाजनाः स्थाने स्थाने गतप्राणाः दृष्टिपथे आयान्ति स्म। स्वप्रजाया इमां दुर्दशां विलोक्य रन्तिदेवो दुःखार्तो जनदुःखनिवारणार्थं सचिन्तो बभूव। तेन राजकोषस्य सर्वमपि द्रव्यराशिमन्नागारस्य सर्वमपि गोधूमयवोदनादिधान्यानां भाण्डारसमूहानि प्रजाजनेभ्यः वितरितानि, किन्त्वनेनापि तस्य प्रजाजनस्याभावपूर्तिर्न जाता। कोषम् अन्न-भाण्डारं च निःशेषं दृष्ट्वा स नृपतिः रन्तिदेवः राजभवनं परित्यज्य तपश्चर्यार्थं वनमध्ये जगाम। तत्र स घोरां तपश्चर्यां चकार। तस्य राज्ञः सम्पूर्णं शरीर-मुग्रतपश्चर्यायाः परिणामेन अस्थिशेषमात्रमवशिष्टम्। तस्य नेत्र-ज्योतिः क्षीणं जातम्। इन्द्रियाण्यपि शिथिलानि बभूवुः। अस्यामवस्थायामपि तं तपश्चर्यायां लीनं विलोक्य भगवान् श्रीनारायणः तस्योपरि प्रसन्नो जातः उग्रतपश्चर्यानिरतस्य रन्ति-देवस्य सम्मुख-मागत्य सः तं सम्बोध्योवाच, ''ब्रूहि ! राजन्! किं वाञ्छसि ? स्वसम्मुखं भगवन्तं विलोक्य सुप्रसन्नेन रन्तिदेवेन तस्य स्तुतिगानं कृतम्। तदनन्तरं करबद्धेन रन्तिदेवेनेदमेव याचितं''प्रभो ! अहं राज्यं, भोगं पुनर्भवमपि च न याचे, अहन्तु दुःखतप्तानां प्राणिनामार्तिनाशनमेव वाञ्छामि।'' भगवता नारायणेनापि ''तथाऽस्तु इत्युक्त्वा निगदितं'' यत्त्वया परहितार्थमेव वरयाचना कृता अतः तव तपश्चर्याऽपि सफला जाता।

भगवतो नारायणात् वरं प्राप्य परम हर्षितेन श्रीरन्तिदेवेन पुनः तस्य नारायणस्य वन्दना कृता। तदनन्तरं श्रीनारायणः तस्य सम्मुखत अन्तर्धानो बभूव। रन्तिदेवस्य पत्न्या तस्य कृते भोजनं प्रेषितम्। श्रीरन्तिदेवो बहुमासेभ्यो निराहार एवासीत्। स्वसम्मुखं क्षीरादीनि सुस्वादूनि व्यञ्जनानि विलोक्य तेन तत्क्षणमेव तद् व्यञ्जनं भगवतः नारायणस्य कृते समर्प्य यदा तेन स्वोदरस्थे जठराग्निमध्ये तस्य हवनार्थं निजदक्षिणहस्त अन्नग्रहणार्थं प्रसारितः तदा एको वृद्धः अनेकैः श्वभिः अनुगम्यमानः तत्रोपस्थितो बभूव। रन्तिदेवं सम्बोध्य तेनोक्तम्। राजन्नहं मया सह एते सर्वे श्वानश्च विगतेभ्यः बहुदिवसेभ्यः क्षुधार्ताः सन्ति। अस्मभ्यं भोजनं देहि अनेन अन्नदानेन तव कल्याणं भविष्यति। अतिथिं दृष्ट्वा प्रसन्नेन श्रीरन्तिदेवेन स्वसम्मुखे निक्षिप्तं सर्वमपि खाद्यजातं तस्मै वृद्धाय समर्पितम्। क्षुधार्तस्य तस्य रन्तिदेवस्येदं अतिथिजनस्य कृते भोजनसमर्पणं विलोक्य सहसा

**आकाशाद् देवैः तत्क्षणमेव पुष्पवृष्टिः कृता। सः वृद्धः प्रच्छन्नो बभूव। पुना रन्तिदेवस्य सम्मुखं भगवान्नारायणः समुपस्थितो जातः। भगवान् उवाच राजन्! तव परीक्षार्थमेव मया स वृद्धः प्रेषित आसीत्। त्वं महानसि, तव अन्तःकरणमपि परमं विशालमस्ति। गच्छ! स्वराज्यं प्राप्य सुखोपभोगं कुरु। पुनः भगवद्दर्शनं प्राप्य श्रीरन्तिदेवः कृतकृत्यो बभूव। तस्य राज्ञः तपः प्रभावात्तस्य प्रजाजनाः सुखिनो बभूवुः। सम्पूर्णोऽपि तस्य राज्ये अन्नधनादिकस्य भौतिकवैभवस्य आध्यात्मिकसमुन्नतेर्विस्तारोऽपि च सर्वत्र सम्बभूव। सत्यमुक्तम् विद्वज्जनैः ''परोपकाराय सतां विभूतयः।'' इति।**

## हिन्दी

## भरतवंशीय रन्तिदेव

सुप्रसिद्ध दुष्यन्त राजा के पुत्र चक्रवर्ती सम्राट् भरत थे। उनने दिग्विजय में किरात, हूण, यवन, आंध्र, कङ्क, खश, शक और म्लेच्छ राजाओं को युद्ध में पराजित किया था। उसी कुल में सङ्कृति का पुत्र रन्तिदेव हुआ। वह चन्द्रनगर में राज्य करता हुआ। परोपकार में निरत था। उसके राज्य में प्रजाजन सुखी निर्विघ्न और दुःख रहित थे।

एक बार उसके राज्य में घोर अनावृष्टि हुई। इसलिये सारे ही खेत तृण धान्य से शून्य हो गए। जलाशय भी जलशून्य हो गए। भूख प्यास से पीडित प्रजाजन स्थान-स्थान पर मरे हुए दिखाई देने लगे। अपनी प्रजा की इस दुर्दशा को देख कर रन्तिदेव दुःख से पीडित होकर जनता के दुःख के निवारण के लिये सचिन्त हो गया। उसने राजकोष के सभी धन को और अन्नागारों के सभी गेहूँ, जौ, चावल आदि भण्डार समूहों को प्रजाजनों को वितरित कर दिया। किन्तु इससे उनके प्रजाजन की अभावपूर्ति नहीं हुई। कोष तथा अन्न भण्डार को समाप्त हुआ देखकर वह राजा रन्तिदेव राजभवन छोड़कर तपश्चर्या करने जंगल में गए। वहां उनने घोर तपश्चर्या की। उस राजा का सम्पूर्ण शरीर उग्र तपश्चर्या के परिणाम स्वरूप अस्थिशेष मात्र रह गया। उनकी नेत्र ज्योति क्षीण हो गई। इन्द्रियाँ भी शिथिल हो गई। इस अवस्था में भी उनको तपश्चर्या में लीन देख कर भगवान् श्री नारायण उनको सम्बोधन करके बोले, ''राजन्! क्या चाहते हो!'' अपने सम्मुख भगवान् को देख कर सुप्रसन्न रन्तिदेव ने उनका स्तुति गान किया। उसके पश्चात् करबद्ध श्रीरन्तिदेव ने यही याचना की कि ''प्रभो! मैं तो दुःखतप्त प्राणियों के पीडा का नाश हो यही चाहता हूँ।'' भगवान् नारायण ने भी ''वैसा ही हो'' यह कह कर पुनः कहा कि ''तुमने परहित में ही वर मांगा है अतः तुम्हारी तपश्चर्या भी सफल हुई।''

भगवान् नारायण से वर प्राप्त करके परम हर्षित श्री रन्तिदेव ने फिर उन नारायण की वन्दना की। इसके पश्चात् श्री नारायण उसके सामने से अन्तर्धान हो गए। रन्तिदेव की पत्नी ने उनके लिये भोजन भेजा। रन्तिदेव अनेक महीनों से निराहार ही थे। अपने सामने खीर आदि सुस्वादु व्यञ्जन देखकर उसी समय उस व्यञ्जन को भगवान् नारायण को समर्पित करके जब उनने अपने उदर में स्थित जठराग्नि में हवन करने को अपना दाहिना हाथ अन्न ग्रहण के लिये फैलाया तो एक वृद्ध अनेकों कुत्तों को साथ लिये वहां उपस्थित हुआ। रन्तिदेव को सम्बोधित करके उसने कहा, ''राजन्! मेरे समान मेरे साथ के ये

सब कुत्ते विगत बहुत दिनों से भूख से पीडित हैं। हमारे लिये भोजन दो, इस अन्नदान से आपका कल्याण होगा।'' अतिथि को देखकर प्रसन्न श्री रन्तिदेव ने अपने सम्मुख रखे सारे खाद्य पदार्थ को उस वृद्ध को प्रदान कर दिया। भूख से पीडित उस रन्तिदेव के इस अतिथि जनों के लिये इस प्रकार के भोजन समर्पण को देखकर सहसा आकाश से देवों ने उसी क्षण पुष्पवृष्टि की । वह वृद्ध गायब हो गया। पुनः रन्तिदेव के सम्मुख भगवान् नारायण समुपस्थित हुए। भगवान् बोले, ''राजन्! तुम्हारी परीक्षा के लिये ही मैंने वह वृद्ध भेजा था। तू महान् है तेरा अन्तःकरण भी परम विशाल है। जाओ ! राज्य प्राप्त करके सुखोपभोग करो।'' फिर से भगवद्दर्शन करके श्रीरन्तिदेव कृतकृत्य हो गया। उस राजा के तप के प्रभाव से प्रजाजन सुखी हो गये। उसके सम्पूर्ण राज्य में अन्नधन आदि भौतिक वैभव की और आध्यात्मिक समुन्नति का विस्तार भी सर्वत्र हो गया। सच कहा है 'सत्पुरुषों का ऐश्वर्य परोपकार के लिए ही होता है। इति।'

**किशनपोल बाजारः, जयपुरम्**

**संस्कृत समाचाराः-**

# आस्था सांस्कृतिकसंस्थया आयोजिता ऋषिपंचमी-पर्व-विद्वत्सम्मानसमारोहाः

जयपत्तनीय आस्था संस्कृतिक संस्थया जयपुर देहली राजमार्गस्थ, ''बंगाली बाबा का आश्रम'' इति स्थाने 14 सितम्बर 2018 ऋषिपञ्चमीपर्वासरे नैकेषां बटुकानां सामूहिक-यज्ञोपवतीसंस्कारः निःशुल्कं सम्पादितः। विद्वत्सम्मानसमारोहः श्रीमतां हरिशङ्करदासवेदान्तिनां आध्यक्ष्ये सम्पन्नः। समारोहे सम्मानिताः विद्वांस आसन्-



1. पं. सुरेश मिश्रा - पं. राधेश्याम व्यास स्मृति सम्मानः
2. डॉ. हेमन्तकृष्ण मिश्रः - पद्म श्री डॉ. मण्डनमिश्रस्मृतिसम्मानः
3. पं. हेरम्बस्वरूपशर्माणः - श्री शिवदत्तजोशिवैदिकसम्मानः
4. श्री योगेशकुमारः - भट्ट मथुरानाथशास्त्री साहित्य सुधाकरसम्मानः
5. पं. श्री अनन्तशर्माणः - पं. मधुसूदन ओझावेदवेदाङ्गसम्मानः
6. डॉ. रामदेवसाहूः - आचार्य उमेशशास्त्री ज्योतिषसम्मानः
7. डॉ. सीमा शर्मा - पं. कल्याणदत्तशर्मा ज्योतिषविद्यामार्त्तण्डसम्मानः
8. पं. सांवरमल शर्माणः - पं. मोहनलालपाण्डेय साहित्यसम्मानः



9. डॉ. अनिताशर्मा - पं. गङ्गासहायजोशी सम्मानः
10. श्री काजोल शास्त्री - पं. शिवचरणशास्त्री ज्योतिष सम्मानः
11. डॉ. नारायण होश्मने - प्रा. कमलकिशोर भारद्वाजवेदसम्मानः
12. डॉ. शंकरलालशर्माणः - पं. ईश्वरदत्त शास्त्री सम्मानः
13. आदित्य अवस्थी - पं. नीतेशभारद्वाज स्मृति सम्मानः
14. ज्शान्त पाण्डेयः - नवोदितप्रतिभासम्मानः



# दानवीरो महर्षिर्दधीचिः

❑ राजीव शर्मा

महर्षिर्दधीचिरासीत् त्यागमूर्तिर्महान् तपस्वी महज्ज्योतिर्मयः। स्वतपसा त्यागेन च स विश्वस्मिन्नपि विश्वे सम्मानमलभत। सम्प्रति महर्षेस्त्यागमयेन जीवनेन प्रेरणां प्राप्नुयुर्लोकास्तदैव नैकविधानां समस्यानां समाधानं भवितुं शक्नोति।

दधीचेः स्वकीयानामस्थीनां दानेन स वज्रो निर्मितो येन वृत्रासुरस्य वधे समर्थो बभूवेन्द्रः सोऽयमृषिर्वेद-कालीनोऽस्ति, वेदेषु महर्षेर्दधीचेर्महिमा कारणद्वयेनोप-बृंहित उपलभ्यते-सोऽयं मधुविद्याया उपदेष्टाऽभूत्। मधुविद्या वृष्टिकरी विद्याऽप्यभूत्-मृतसंजीवनीव काचिदद्भुताऽपि विद्या बभूव, तां चाधिकारी परमर्षिरेव ज्ञातुं प्रभवतिस्म तामुपदेष्टुं तु न कश्चिदपि प्रभवति स्म। इन्द्राय केवलं इमां मधुविद्यां सकृदवागमयत्। अकथय-दिन्द्रस्तदनन्तरं दधीचे यत्त्वया स्वमुखात् कदापि कस्मै अपि नेयमुपदेष्टव्या विद्या। किन्तु केवलं मनोगता विद्या कस्य लाभार्थं स्यात्। यदि कस्मैचिद् भिषजे नेयमवगमिता स्यात् तर्हि तया कस्य हितं स्यात्। न कस्यापि। अश्विनौ खलु देवभिषजावास्ताम्। यदि ताविमामज्ञास्यतां तर्हि रोगिणां महानुपकारोऽभविष्यत्। अतस्ताभ्यामाथर्वणो दध्यङ्ङ्ः प्रार्थितो मधुविद्यामुपदेष्टुम्, किन्तु तेन सूचितं यदिन्द्रेण स्वमुखात्कस्मायप्यस्या उपदेशं नाहं कुर्यामित्यादिष्टमस्ति। एतच्छ्रुत्वा अश्विभ्यां दधीचेः शिरो निपात्याश्वशिरस्तत्र प्रत्यारोपितं कथितं च यद् भवान् स्वमुखादुपदिशत्विति।

वृत्रासुरस्यात्याचारैः पीडितस्य जगतस्त्राणाय वज्रस्यावश्यकता यदाऽनुभूता तदा महर्षिणा दधीचिना स्वकीयान्यस्थीनि समर्पितानीति कथा तु विश्वविदिता। तदस्थि-निर्मितेन वज्रेणैव देवशत्रोः वृत्रासुरस्य वधोऽभवत्। श्रीमद्भागवते दधीचेर्महिमा सविस्तरं स्तुत इति जानन्त्येव भागवतपाठिनों यत्र दधीचेरस्थि-भिर्वज्रनिर्माणकथा प्रसिद्धा। वृत्रासुरनामासुरेण पराजिताः पीडिताः देवाः भगवन्तं विष्णुं प्रार्थयन्ति भगवन्-मार्गनिर्देशानुसारं यदा देवाः महर्षिं प्रार्थयन्ति पीडाञ्च निवेदयन्ति तदानीं महर्षिर्वदति शरीरमिदं नश्वरमेव यदि मम अस्थिभिः देवकार्यं सेत्स्यति तर्हि मे तपसः सार्थकत्वम्। महर्षिस्तत्क्षणमेव सम्पूर्णमानवसमाजस्य शत्रोः विनाशाय योगबलेन शरीरं पञ्चतत्वेषु विलीय अस्थिदानं करोति, अस्थिभिः देवो विश्वकर्मा वज्रं निर्माति, वृत्रासुरश्च तेन विनश्यति।

महर्षिदधीचिरस्माकं जीवनस्य आदर्शो भवतु। सम्पूर्णमिदं जगद् दानस्य गौरवशीलपरम्परायामेव सुस्थितं विद्यते। अधुना विचारयामो यन्महर्षिर्दधीचिः किमिति सर्वश्रेष्ठः शिखरस्थो दानवीरोऽस्ति। मुक्तहस्ताभ्यां प्रदातारो न कदापि अभावग्रस्ता जायन्ते कूपः स्वस्मिन् संचितं जलं निरन्तरं वितरति पुनरपि न रिक्तत्वं भजते प्रकृतिः पुनस्तावदेव जलं कूपे संस्थापयति। संग्रहकर्तारः स्वार्थिनः स्वकेन्द्रिताश्च जायन्ते। केवलमात्मीयानां स्वजनानामुदरपूर्तिमेवेमे चिन्तयन्ति। दानिनः परमोदाराः पूर्णस्वार्थं विहाय परहिताय प्रयतन्ते ते स्वभावतः परोपकारिणः शुभं परिणामं प्राप्नुवन्ति। लोकहिते प्राणोत्सर्गकारणेनाद्-भुतक्षमाभावेन च सर्वश्रेष्ठमहादानिषु परिगण्यते दधीचिः। महर्षेर्दधीचेः त्यागेन अस्माभिः प्रेरणा प्राप्तव्या परोपकारार्थमिदम् शरीरम् इत्यनुसृत्य भारतवर्षस्य हिताय धर्मरक्षायै स्वकीयप्राणान् त्यक्तुं तत्पराः भवेम।

न्यू कॉलोनी, झोटवाड़ा, जयपुरम्

# ज्ञानमूलम् अभिरुचिः

❑ चरन सिंहः

**अभिरुचिः -**

आंग्लभाषायां 'Interest' इति उच्यते। अस्यार्थः अभिलाषः। अभिरुचिः एका आन्तरिकी प्रेरणाशक्तिः वर्तते। या अस्मान् कस्यापि वस्तुनं व्यक्तिं क्रियां वा प्रति अवधानं दातुं प्रेरयति। अभिरुचिः बालकान् शिक्षणे सहायतां प्रददाति। छात्राणां दृष्टिकोण-प्रवृत्ति-अन्यव्यक्तित्व-सम्बद्धविशेषतानां च निर्माणे सहायिका भवति। अभिरुचेः अर्थं स्पष्टं कर्तुं मनोवैज्ञानिकैः निम्नलिखिताः परिभाषाः दत्ताः।

**अभिरुचेः परिभाषाः -**

**ड्रैवर महोदयानुसारम् -** ''अभिरुचिः स्वक्रियात्मक रूपे एको मानसिकः संस्कारो वर्तते।''

**मैक्कडूगल महोदयानुसारम्-** ''अभिरुचिः प्रच्छन्नं अवधानमस्ति तथा च अवधानम् अभिरुचेः क्रियात्मकं रूपं वर्तते।''

**क्रो एण्ड क्रो महोदयानुसारम्-** ''अभिरुचिः सा अभिप्रेरिका शक्तिरस्ति या अस्मान् कामपि व्यक्तिं, वस्तुं क्रियां वा प्रति अवधानं दातुं प्रेरयति।''

**जे. एस. महोदयानुसारम्-** ''यद् वस्तु अस्भाभिः सम्बद्धं भवति अथवा अस्माकं कृते प्रयोजनपूर्णं भवति, तस्मिन् अस्माकम् अभिरुचिर्विद्यते।''

**स्ट्राँग महोदयानुसारम्-** ''अभिरुचिः एकं रुचिकरं प्रत्युत्तरमस्ति।''

**क्रो एण्ड क्रो महोदयानुसारम् -** ''अभिरुचिः सा अभिप्रेरिका शक्तिः वर्तते या अस्मान् व्यक्तिं वस्तु क्रियां च प्रति अवधानाय बध्नाति। अन्यथैषा एका प्रभावात्मिकाऽनुभूतिर्वर्तते। या स्वयं क्रिया द्वारा अभिप्रेरिता भवति। अन्येषु शब्देषु अभिरुचिः कस्या अपि क्रियायाः कारणं यदि भवितुं शक्नोति अपि च तस्याः, क्रियायाः परिणामोऽपि भवितुं शक्नोति।''

(Interest may refer to the motivating force that impels us to attend to a person a thing or an activity or it may be the effective experience that has been stimulated by the activity itself. In other words, interest can be the cause of an activity and the result of participation in that activity 1973, D. 248)

**बी.एन. झा महोदयानुसारम् -** 'रुचिः सा स्थिरं मानसिकं तन्त्रमस्ति या अवधानस्य एकाग्रतायाः कृते कार्यं गतिमन्तं करोति।'

(Interest is that enduring mental system which sustains concentration and continues that activity and attention - 1946, p. 247)

**रॉस अनुसारम्-** ''यत् वस्तु अस्माभिः सम्बद्धं भवति अथवा अस्माकं कृते प्रयोजनपूर्णं भवति, तस्मिन् अस्माकमभिरुचिर्विद्यते।''

(A thing that interests us is just something that concerns us or matters to us 1951, P. 170)

**संस्कृताध्यापनं प्रत्यभिरुचिः –**

विद्यालयीयस्तरादारभ्य विश्वविद्यालयस्तरं यावत् ये छात्राः संस्कृताध्ययनं कुर्वन्ति तेषां संस्कृतभाषाविकासः, मौखिकरूपेण लिखितरूपेण वा बहु न दृश्यते। संस्कृताध्ययनं प्रति बहुषु अभिरुचिर्नावलोक्यते। तत्र कारणानि बहूनि। क्वचित् योग्यसंस्कृतज्ञस्याभावः क्वचित् योग्यशिक्षणविधेरभावः क्वचित् च पुनः संस्कृतभाषाया आवश्यकता-सन्दर्भे स्पष्टमार्गदर्शनस्याभावः, इत्येवं बहुभिः कारणैः छात्राः अध्ययनं प्रत्यभिरुचिं न धारयन्ति। अतः स्पर्धाभावना या छात्रेषु सहजरूपेण वर्तते तां भावनामाधारीकृत्य अध्ययनार्थ-मधीतस्य विकासार्थञ्च काश्चन भाषाविकासस्पर्धाः आयोजनीयाः। संस्कृता-ध्ययनं व्यक्तेः गुणानां प्रति संकेतं प्रददाति। अस्य माध्यमेन मानवजीवनस्य कौशलतायाः ज्ञानं प्राप्नोति। संस्कृताध्ययनेन कार्यं सरलं सफलमपि भवति तस्य कृते रुचिः स्यात्। आधुनिककाले अभिरुचिं निर्मातुं वैज्ञानिकाधारः वर्तते-चलचित्रम्, आकाशवाणी, समाचारपत्राणि, दूरदर्शनम् इत्यादिभिः रुचिं जागरयामः। निरन्तरं प्रचारद्वारा, विज्ञापनद्वारा जनानां मनस्सु संस्कारम् उत्पादयेम, येन वस्तुतः जनेषु संस्कृतं प्रत्यभिरुचिः उत्पन्ना स्यात्। ये निरक्षराः ते श्रुत्वा नैसर्गिक-सात्विक विवेचनादिभिः प्रकटितानां भावानामाधारेण रुचिं निर्मान्ति। अतः कस्यापि समर्थस्य समीक्ष्यवादनः सविधेः यदि रचनायाः निर्माणं भवति तर्हि तद् बहुविख्यातम् एवं सुन्दरं मन्यते। यथा-आचार्यस्य रामचन्द्रमहोदयस्य आश्रयं लब्ध्वा जायसी इति हिन्दी भाषायाः कविर्विख्यातो जातः। अभिरुचेः निर्माणे प्रचारस्य एवं विज्ञापनस्य आवश्यकता महती वर्तते। केचन अभिरुचिश्च भावविशेषः अवधानात् पूर्वभाविनी च इति मन्यन्ते।

**मैक्डूगल वदति**– ''अभिरुचिरनभिव्यक्तमवधानं भवति अवधानञ्च अभिव्यक्तिः''

**शोधार्थी**
**रा. सं. संस्थानम् जयपुर परिसरः, जयपुरम्**

**संस्कृतमाचाराः**

## सम्मानसमारोहः

**❑ वार्ताहरः बद्रीप्रसाद शर्मा**



श्री निम्बार्क वैदिक संस्कृत समितिमण्डल शाखया ब्यावर राजस्थाने संस्कृतदिवसस्योपलक्ष्ये पुरस्कार-वितरणं विद्वत् सम्माननम् विद्यार्थिनां सम्मान समारोहः आदर्श विद्या मन्दिर विद्यालयस्य सभागारे समायोजितः वैदिक समित्याः मण्डल संयोजकेन श्रीमान् बद्रीप्रसाद शर्मणा श्रीमती श्वेता दाधीच मुख्यातिथ्ये समायोजितम्। कार्यक्रमस्य संचालनम् श्रीमता हरीशशर्मामहोदयेन देववाण्यां कृतम्। श्री निम्बार्क वैदिक संस्कृत समित्याः संयोजकेन प्रधानाचार्यमहोदयस्य स्मृतिचिह्नेन सम्माननं कृतम् श्रीमती श्वेता दाधीचेनोक्तम् यत् संस्कृत भाषैव सर्वासां भाषाणां जननी अस्ति अस्या। भाषायाएव अन्यभाषाणामुत्पत्तिः अभवत् तया उक्तम् यत् संगणकस्य कृते सर्वत्र संस्कृत भाषा अन्यभाषापेक्षया उपयुक्ता वर्तते। कार्यक्रमे स्थानीयविद्यालयस्य विभिन्न प्रतियोगितासु ये विजेतारः अभवन् तेषां छात्राणाम् प्रशस्तिपत्र-पारितोषिकेण मंचे सम्मानः कृतः। अस्मिन् संस्कृत-दिवससम्मानसमारोहे अनेके संस्कृतानुरागिणः उपस्थिताः आसन्।

**ब्यावर, राजस्थान**

# बृहदारण्यकोपनिषदि वर्णितस्य गर्भाधानसंस्कारस्य महत्त्वम्

❑ प्रशान्त शर्मा

उपनिषत्काले संस्काराणां विधिविधानानि बहु सरलानि आसन्। तन्मध्ये बाह्याडम्बराणां स्थानं नासीत्। संस्कारेऽस्मिन् निहिता विषया व्यक्तेः सर्वाङ्गीण-विकासाय परिलक्षिता भवन्ति। गर्भाधानादारभ्य अन्त्येष्टि-पर्यन्तं यानि विधानानि भवन्ति तानि व्यक्तेः सम्पूर्णजीवनाय उच्चस्तरीय-भूमिकायाः निर्माणं कुर्वन्ति। बृहदारण्यकोपनिषदि गर्भाधान-सोष्यन्ति-कर्मजातकर्म-नामकरण-उपनयन-वानप्रस्थ-संन्यास-अन्त्येष्ट्यादिसंस्काराणां साङ्गोपाङ्गं वर्णनं मिलति। एतदतिरिच्य अन्येषां संस्काराणामपि पर्याप्ताः विषयाः मिलन्ति।

**गर्भाधानम्**- संस्कारेणाऽनेन उत्तम-बलिष्ठसन्तानस्य प्रजननं भवति। अस्य संस्कारस्य सम्बन्धः यौनविज्ञानेन सह अधिकं भवति। संस्कारेऽस्मिन् न केवलं हवनस्तवनादीनि भवन्ति अपितु सन्तानप्राप्त्यर्थं तात्कालिकतत्परतायाः अपि ज्ञानं भवति। शुक्लवर्णीयवेदज्ञदीर्घायुसम्पन्नपुत्रस्य प्राप्त्यर्थं दम्पत्योः कृते दुग्धमिश्रिततण्डुलाहारस्य प्रावधानं वर्तते।

**''स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रूवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातमीश्वरौ जनयितवै।।''** (बृ.उ. 6/4/14)

ये कपिलम् अर्थात् पिंगलवर्णीयं, वेदस्याध्येतारं तथा च शतायुषं पुत्रमिच्छन्ति ते तण्डुलान् दध्ना सह पाचयित्वा घृतेन सह खादन्तु।

**''अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातमीश्वरौ जनयितवै।।'' (बृ.उ 6/4/15)**

ये श्यामवर्णीयम्-अरुणनयनीयं-वेदत्रयाणामध्येतारं-शतायुषं च पुत्रमिच्छन्ति ते जलेन तण्डुलान् पाचयित्वा घृतमिश्रणं कृत्वा खादन्तु।

**''अथ य इच्छेत् पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन् वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तम् अश्नीयातमीश्वरौ जनयितवै।।'' (बृ.उ. 6/4/16)**

पुत्रप्राप्त्यतिरिक्तं ये जनाः विदुषीं कन्यामिच्छन्ति तेषां कृतेऽपि विधानं भवति। शतवर्षीयां विदुषीं कन्यां ये जनाः इच्छन्ति ते तिलमिश्रिततण्डुलान् पाचयित्वा घृतमिश्रणं कृत्वा खादन्तु।

**''अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातमीश्वरौ जनयितवै।''(बृ.उ 6/4/17)**

ये सर्ववेदज्ञं-विख्यातं-मधुरभाषिणं-पूर्णायुप्राप्तं च पुत्रमिच्छन्ति तैः ऋषभौषधेः बीजेन सह माषं घृतञ्च मिश्रयित्वा भोजनं कर्तव्यमिति विधानमस्ति।

**''अथ य इच्छेद् पुत्रो मे पण्डितो विगीतः समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति मांसौदनं पाचयित्वा सर्पिष्मन्तम् अश्नीयातमीश्वरौ जनयितवै औक्षेण वार्षभेण वा।।''** (बृ.उ 6/4/18)

गर्भाधानस्य सम्पुष्ट्यर्थं ऋषभनाम्न्या औषधेः भक्षणस्य विधानं वर्तते। औषधिरियं जीवनीय-बलयुक्ता-शुक्रजनिका च मन्यते। आयुर्वेदशास्त्रेऽपि सुष्ठु सन्ततेः प्रजनने भोजनस्य महत्त्वपूर्णं स्थानं भवतीति कथितमस्ति।

अनेन प्रकारेण ज्ञातं भवति यत् बलिष्ठ-मेधाविसन्ततेः समुत्पादनाय व्यक्तेः सन्तानोत्पादिका अभीप्सा एव परिणामः प्रतीयते। दम्पत्ती औषधिमाध्यमेन सम्पुष्टौ करणीयाविति योजना सर्वथा निराधारा न भवति। ऐतरेयोपनिषदि कथितमस्ति यत् गर्भः आदौ पुरुषाश्रितः भवति। यदा शुक्राणुः सर्वेषामङ्गानां माध्यमेन सशक्तो भवति तदा स्त्रीषु तस्य सेचनं कर्तव्यम्। अतः गर्भरूपे प्रथमं तु पितुः स्थितिर्भवति तदनन्तरं च मातुः।

''पुरुषो ह वा अयमादितो गर्भो भवति यदेतद्रेतः... प्रथमं जन्म।'' (ऐ.उ 4)

**शोधछात्रः**
**ज.रा.रा.सं. विश्वविद्यालयः, जयपुरम्**

लेखकीय प्रतिक्रिया

# किञ्चिद् विनिवेदनम्

डॉ. सत्यव्रत वर्मा

भारत्याः सितम्बरमासाङ्के मत्कृतः 'कविराजो विश्वनाथस्तस्यानुपलब्धाः कृतयश्च' इत्याख्यो निबन्धः प्राकाश्यमगात्। सम्पादकमहाभागैः स सोत्साहं सुष्ठु च प्रकाशित इति तान् धन्यान् वदामि। परमस्त्यत्र किमपि मे वक्तव्यम्। निबन्धे मन्निहितान् कांश्चित् प्रयोगान् आसाधून् मत्वा कश्चिद् बुधस्तत्र कमपि परिवर्तम् अकार्षीत्। स च विचारणामर्हति।

अष्टमे पृष्ठे, प्रथमे खण्डे अधस्तात् तृतीयपंक्त्यां, नवमे पृष्ठे, प्रथमे खण्डे द्वितीय पंक्त्यां च 'प्रणष्टाम्' इति पदं मुद्रितम्। द्वादशपृष्ठे द्वितीय खण्डे अधस्तात् प्रथम पंक्त्यां च 'प्रणष्टाः' इति पदं दृग्गोचरं भवति। हस्तलेखे मत्प्रयुक्तेष्वेषु णत्वरहितेषु पदेषु णत्वं निधाय तानि परिष्कर्तुम् अचेष्टत कश्चिद् विज्ञ इति चित्रम्। **नशेः षान्तस्य** इत्यनेन णत्वं सर्वात्मना निषिद्धम्। णत्वोपेतानीमानि पदानि सुतरां चिन्त्यानि त्याज्यानि च। णत्वरहितं 'प्रनष्ट' इति रूपमेव पाणिनीयम्।

दशम पृष्ठे द्वितीय खण्डे चतुर्दश पंक्त्यां मल्लिखितस्य 'नारेकः' इत्यस्य स्थाने 'नातिरेकः' कुतश्चिदापतितः। अत्र 'नारेकः' एव साधुः। आरेकः सन्देह इत्यनर्थान्तरम्। मनागप्यौचित्यं न बिभर्ति अतिरेकोऽत्र। उत्साहातिरेको न सर्वत्र काम्यः।

अष्टमपृष्ठे प्रथमखण्डे, अष्टमपंक्त्यां 'प्रत्नभाविनी' इति पदं न्यक्कृत्य यत् 'प्रत्यग्रभाविनी' पदं न्यस्तं तद्विपरीतमर्थमत्राऽभिधत्ते। नासावर्थोऽत्रेष्यते। प्रत्नभाविनीः प्राग्भाविनीः पूर्वगता इत्यर्थः।

अष्टमपृष्ठे प्रथमे खण्डे 22 पंक्त्यां 'रामचरितादीना... भाणप्रहसन-व्यायोगः' इत्यत्र केषाञ्चित्पदानां लोपात् द्वे वाक्ये परस्परम् अन्तः प्रविष्टे। तच्छोधनीयम्।

द्वादशपृष्ठे द्वितीयखण्डे तृतीयपंक्त्यां 'पद्यबन्धोदाहरणम्' इत्यस्य स्थाने 'पद्मबन्धोदाहरणम्' इति पठनीयम्।

अन्याविष्कृता इमे परिवर्ता वा प्रयोगा वा निबन्धकर्तरि नारोपिताः स्युरिति सर्वमिदं निर्दिष्टम्। यदत्र चापलं तत्क्षन्तव्यम्।

**( राष्ट्रपतिसम्मानितः )**
**7/34, पुरानी आबादी,**
**नामदेव फ्लोर मिल समीपे, श्रीगंगानगर**

**टिप्पणी : गीर्वाणगिरो विशालः शब्दभाण्डागारः सहस्राब्दीषु प्रसृतं व्याकरणं च बहुविधान् शब्दान् बिभर्ति। एवंविधेन विचारमन्थनेन बहुमूल्यं ज्ञानं प्राप्येतेति विद्वद्वर्यस्य पत्रमिदमत्र प्रकाश्यते।**

**-प्रधानसम्पादकः**

नारी-स्तम्भः

# सुखं ननु सापेक्षिकम्

❑ डॉ. राजेश्वरी भट्ट

आधुनिकतायाः पक्षधरा सुरुचिसम्पन्ना मञ्जरी आत्मनः पाकशालां नवीनैरुपकरणैर्नवरूपां कर्त्तुं बहुकालात् प्रयुक्तानि विभिन्नधातुभिर्निर्मितानि स्थाली कटोरिका दर्वि-चरू जलकलशादीनि बहून्यन्यानि पात्राणि च अनुपयोगीनि मन्यन्ती तानि पाकशालाया बहिस्थितस्यालिन्दस्य एकस्मिन् कोणे निधाय अन्या असुरुच्या क्रीतानि मनोऽनुकूलानि पात्राणि समुचितस्थानेषु सज्जीकृत्य पाकशालाया बहिरागत्य सुखमन्वभवत्। ततो अलिन्दे स्थितानां पात्राणां समूहे दृष्टिं क्षिपन्ती साऽचिन्तयत् यद् एतानि पात्राणि श्वः जीर्णशीर्णवस्तूनि, लौह-काष्ठ-ताम्रादिभिर्धातुभिर्निर्मितानि भग्नानि वक्राणि च पात्राणि, समाचारपत्रादीनि च क्रयणाय नित्यं मार्गे भ्रमणं कुर्वते श्रमिकाय दत्त्वा भारमुक्ता भविष्यामि। अस्मिन्नेवान्तराले शाटिकाया अग्रभागं कटिबद्धं कुर्वती, त्वरितगत्या पादौ सञ्चालयन्ती गृहकर्मकरी द्वारतः प्रविष्टा जाता। अलिन्दस्य कोणे स्थितानां पात्राणां समूहं दृष्ट्वा किंकरी तेषां मार्जने जातस्य विलम्बस्याशङ्कया खिन्ना, सेवावृत्तिं भर्त्सयन्ती अग्रिमादेशं प्राप्तुं गृहस्वामिनीमपृच्छत्। पात्राणां परिणामविषये गृहस्वामिन्या निर्णयेनावगता किंकरी साहसं कृत्वा अभिमुखे स्थितेषु पात्रेषु एकां स्थालीं गृहस्वामिनीमयाचत। किंकर्या अभीष्टं श्रुत्वा गृहस्वामिनी तस्यै पात्रसमूहे स्थितेषु पात्रेषु यथेच्छं पात्राणि ग्रहीतुमादिदेश। मञ्जरी-मुखनिः सृतानि आनन्दकराणि वचनानि श्रुत्वा कर्मकरी अभिमुखे स्थितं पात्रसमूहं अमूल्यकोषमिव गणयन्ती प्रसन्नमनसा द्वाभ्यां कराभ्यां बृहदाकारं स्यूतमेकं मुखपर्यन्तं पूरयित्वा विद्युद्गत्या गृहं प्रस्थितवती। गृहं प्राप्य सा सर्वप्रथमं निवासकक्षस्य एकस्मिन् कोणे प्रयुज्यमाने भोजनस्थले स्वामिन्या प्रदत्तानि पात्राणि यथास्थानं सज्जीकृतवती, आत्मनः जीर्णानि पात्राणि एकतः निधाय गृहकार्यं सम्पादयितुं पुनर्गन्तुं मनः अकरोत् तदैव एकः पिपासुः भिक्षुको द्वारि आगत्य जलमयाचत। कर्मकरी झटिति आत्मनो जीर्णतरेषु पात्रेषु एकं जलपात्रं जलेन पूरयित्वा भिक्षुकाय ददौ। जलपानेन तृप्तो भिक्षुकस्तस्यै आशिषो व्याहरन् जलपात्रं पुनर्दातुं अग्रे आगच्छत्। तदा कर्मकरी तेन जलपात्रेण सह आत्मनः कृते व्यर्थानि जीर्णपात्राण्यपि सहैव नेतुं भिक्षुकमब्र-वीत्। किंकर्या दीयमानानि जीर्णतराणि वक्राणि, दुर्दशागतानि पात्राणि गृहीत्वा भिक्षुकः हर्षेण भरितो गृहमगच्छत्। नित्यं कटोरिकाया अभावे करपात्रे भोजनं कुर्वतो भिक्षुकस्य कृते भिन्नभिन्नपात्रेषु भोजनस्य कल्पना आशातीताऽऽसीत्। दीयमानेषु पात्रेषु एको वक्रश्चमसोऽप्यासीत्। रिक्तं यं चमसं मुखेन स्पृष्ट्वा सुखसागरे मज्जनुन्मज्जन् भिक्षुकः अद्य आत्मानं कस्मादप्यधिकारिणो न्यूनं नामन्यत।

कानिचिद् दिनानि पूर्वं हिन्दीभाषायाः पत्रिकायां प्रकाशितेयं कथा नूनं लोकोपकारिणी अनुकरणीया, प्रेरणादायिनी च वर्तते। विशेषेण नारीणां कृते इयं लघुकथा विचारोत्तेजिका वर्तते। दृश्यते यत् प्रायः गृहेषु अधिकोपयोगेन, परिमाणवैषम्येन, आधुनिकताया अनुकरणेन च वस्त्राणि, पुस्तकानि, पात्राणि, अन्यानि बहूनि वस्तूनि च अनुपयोगीनि भवन्ति। गृहसदस्या विशेषेण नार्यो वस्त्राणां महद्-राशिं मार्गे भ्रमद्भ्यः विक्रेतृभ्यः प्रदाय तत्स्थाने अल्पमूल्यानि भाजनानि गृह्णन्ति। एवमेव गृहेषु सम्प्रति अनुपयोगीनि जातानि महार्हाणि वस्तूनि यस्मै कस्मै अपात्राय प्रदाय महता पुण्येन वञ्चिता भवन्ति। ता न जानन्ति यत् अस्माकं कृते अनावश्यकानि वस्तूनि अन्येषां कृते सुखास्य साधनानि भवितुं शक्नुवन्ति।

**अतः अभ्यर्थिनां सहायतां कृत्वा स्वयमपि सुखिनः स्याम।**

**हिन्दी अनुवाद**

आधुनिकता की समर्थिका सुरुचिसम्पन्ना मंजरी ने अपनी रसोई को नये-नये उपकरणों से नया रूप देने के लिए रसोई में बहुत समय से प्रयोग में आने वाले भिन्न-भिन्न धातुओं से निर्मित थाली-कटोरी, चरू जलकलश आदि अन्य अनेक पात्रों को रसोई के बाहर वाले आँगन के एक कोने में रखकर उसके स्थान पर सुरुचि से खरीदे हुए मनोनुकूल पात्रों को समुचित स्थान पर सजाकर रसोई से बाहर आकर चैन प्राप्त किया। बाहर आकर आँगन में रखे हुए पात्रों के समूह पर दृष्टि डालते हुए सोचने लगी कि कल इन बर्तनों को टूटे फूटे बर्तन, अखबार आदि वस्तुओं को खरीदने के लिए नित्य रास्ते में घूमने वाले कबाड़ी को देकर चैन पाऊँगी। इतने में ही साड़ी के पल्ले से कमर कसती हुई पैरों को तेजी से पटकती हुई नित्य घर का काम करने वाली नौकरानी दरवाजे से प्रविष्ट हुई। आँगन के कौने में रखे हुए पात्रों के ढेर को देखकर कर्मकरी उनको माँजने से होने वाले विलम्ब की आशङ्का से खिन्न तथा अपनी सेवावृत्ति की भर्त्सना करती हुई गृहस्वामिनी से बर्तनों के विषय में क्या करना है? यह पूछने लगी। बर्तनों के विषय में स्वामिनी के निर्णय को जानकर काम करने वाली बाई ने साहस से सामने स्थित पात्रों में से एक थाली स्वामिनी से माँगने का साहस किया। 'बाई' की इच्छा जानकर मञ्जरी ने बाई को बर्तनों के ढेर में से मनचाहे बर्तन ले जाने का आदेश दिया। मञ्जरी के मुख से निकले हुए आनन्ददायक वचनों को सुनकर बाई आँगन में सामने स्थित बर्तनों के समूह को अमूल्य खजाना समझकर प्रसन्न मन से अपने दोनों हाथों से एक बहुत बड़े झोले में ऊपर तक भरकर तेजी से अपने घर चली गई। घर पहुँचकर सबसे पहिले बाई ने अपने रहने के कमरे में ही एक कोने में प्रयोग किए जाने वाले भोजनस्थल पर स्वामिनी के द्वारा दिए हुए बर्तनों को ठीक से रख दिया फिर पुनः शिष्ट कार्य को करने के लिए स्वामिनी के घर जाने को तैयार हुई तभी द्वार पर आये हुए एक प्यासे भिक्षुक ने जल की याचना की। काम करने वाली बाई ने झट से अपने एक पुराने गिलास में जल भरकर भिक्षुक को दिया। जल पीकर प्रसन्न भिक्षुक जलपात्र को पुनः देने के लिए जैसे ही आगे बढ़ा तो बाई ने उसे गिलास के साथ-साथ अपने अधिक पुराने बर्तनों को व्यर्थ समझ ले जाने का आदेश दिया। काम करने वाली बाई के द्वारा दिये जाने वाले घिसे पिटे बर्तनों को लेकर हर्ष से भरकर भिक्षुक अपनी कुटिया में चला गया। प्रति दिन कटोरे में अथवा, पात्रों के अभाव में हाथों में ही भोजन करने वाले भिक्षुक के लिए भिन्न-भिन्न पात्रों में भोजन करने की कल्पना आशातीत थी। कर्मकरी के द्वारा दिये गए पात्रों में एक टेढ़ा सा चम्मच भी था। उस खाली चम्मच को मुख में लगाकर सुख के सागर में गोते लगाता हुआ भिक्षुक आज अपने को किसी उच्च अधिकारी से कम नहीं समझ रहा था।

कुछ दिन पूर्व किसी हिन्दी पत्रिका में प्रकाशित यह लघुकथा लोकोपकारिणी, प्रेरणादायिनी, तथा अनुकरणीया है। विशेष रूप से नारियों के लिए यह कथा विचारणीया है। प्रायः सभी घरों में अधिक उपयोग से, परिमाण की भिन्नता से, आधुनिकता के अनुकरण से बहुत सी वस्तुएँ अनुपयोगी हो जाती हैं। घर के सदस्य, उन अनुपयोगी वस्त्रों को, पुस्तकों को अन्य अनावश्यक वस्तुओं के रास्ते में घूमने वाले कबाडियों को कम मूल्य में देकर प्रसन्न हो जाते हैं अथवा स्त्रियाँ वस्त्रों के स्थान पर कॉच के बर्तन लेकर प्रसन्न हो जाती हैं। इस प्रकार घर में अनुपयोगी किन्तु बहुत महंगी वस्तुएँ हर किसी अपात्र को देकर पुण्य से वञ्चित रहती हैं। वो नहीं जानती है कि हमारे लिए अनावश्यक ये वस्तुएँ दूसरों के लिए सुख का साधन हो सकती हैं। अतः जरुरतमन्दों को सहायता प्रदान कर स्वयं भी सुख का अनुभव करें।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# व्यायामः स्थैर्यकराणां श्रेष्ठः

❏ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**'यद् यदाचरति श्रेष्ठः तत् तदेवेतरो जनः' प्राचीन-काले त्वेतन्मूलमन्त्रमासीज्जनानामाचारस्य व्यवहारस्य च। श्रेष्ठः को भवति इति तु विस्तृतरूपेण व्याकरणीयं वर्तते, पुनरपि संक्षेपेणैतत्कथयितुं शक्यते यद् योऽतिशयेन प्रशस्यो भवति स एव श्रेष्ठः। जनानां प्रशस्यत्वं तु भिन्न-भिन्न-विषयेषु भिन्न-भिन्नरूपेण भवति। अत एवैतादृग्विधाः जना अन्येषु विषयेष्वश्रेष्ठाः सन्तोऽपि विषयविशेषमधिकृत्य श्रेष्ठा एव भवन्ति। आधुनिकाः वैज्ञानिका एतादृग्विधा एव भवन्ति, ते विषयविशेषे श्रेष्ठाः भवन्ति, किन्त्वन्येषु विषयेष्वाचारेषु व्यवहारेषु च त एव श्रेष्ठा भवेयुरिति तु नैवावश्यकम्। पुनरपि विषयविशेषे तु ते श्रेष्ठा एव गणनीयाः।**

'श्रेष्ठ व्यक्ति जो-जो आचरण करता है, अन्य व्यक्ति भी वही करता है (उसका अनुसरण करता है)' प्राचीन काल में लोगों के आचार एवं व्यवहार का यह मूल मन्त्र था। श्रेष्ठ कौन होता है? यह तो विस्तृत रूप से विश्लेषण योग्य है (कथनीय है) फिर भी संक्षेप में यह कहा जा सकता है कि जो अत्यधिक प्रशंसा के योग्य है वही श्रेष्ठ है। लोगों की श्रेष्ठता (या ज्येष्ठत्व अथवा प्रशस्यत्व) तो भिन्न-भिन्न विषयों में भिन्न-भिन्न रूप से होती है। इसलिए इस तरह के लोग अन्य विषयों में अश्रेष्ठ होते हुए भी विषय-विशेष की दृष्टि से श्रेष्ठ ही होते है (इस विषय में पारङ्गत होते हैं)। आधुनिक वैज्ञानिक इस तरह के ही होते हैं, वे विषय-विशेष में श्रेष्ठ होते हैं, किन्तु अन्य विषयों में तथा आचार एवं व्यवहार में भी वे ही श्रेष्ठ हों यह तो आवश्यक नहीं है। फिर भी विषय-विशेष में तो वे श्रेष्ठ ही गिनने योग्य हैं।

**प्राचीन-भारतीयशास्त्रेषु तु ते श्रेष्ठा आप्ता इति कथिताः ये दोषरूपाभ्यां रजस्तमोभ्यां निर्मुक्ता भवन्ति। ये रजस्तमोभ्यां निर्मुक्ताः भवन्ति ते सर्वदा सत्यमेव वदन्ति, यतो हि रजस्तमोनिर्मुक्ते सत्त्वगुणोद्रेकादमलविज्ञाने कथमप्यसत्यकथनं न सम्भवति। असत्यं तु मिथ्याज्ञानादभिधीयतेऽथवा सम्यग् ज्ञाने सत्यपि रागद्वेषाभ्यामसत्यमभिधीयते। रजस्तमोभ्यां निर्मुक्ताः जनास्तु रागद्वेषाभ्यां निर्मुक्ताः भवन्ति सर्वदा मिथ्याज्ञानविरहितास्तु ते 'आप्ताः' इति श्रेष्ठसंज्ञया संज्ञिताः। वर्तमानकाले येऽनुसन्धानकर्तारः वैज्ञानिकाः भवन्ति तेष्वप्याप्तसंज्ञा व्यवहरणीया वर्तते किन्तु सा संज्ञा तु सीमिता वर्तते केवलं तद्-विषयपर्यन्तमेव। अत एवानुसन्धानानन्तरं ते तद्विषयमधिकृत्य यत् कथयन्ति तत्तु सत्यमेव भवत्यत एवाचरणीयमपि वर्तते। प्राचीनेषु महर्षिषु त्वाप्तत्वं प्रतिष्ठितम् आसीत्। अत एव तेषामुपदेशाः सर्वथा सत्यमेव भवन्ति स्म। तत्कालीना उपदेशाः वर्तमानकालेऽप्याचरणीयाः परिपालनीयाश्च वर्तन्ते।**

प्राचीन भारतीय शास्त्रों में तो वे श्रेष्ठ आप्त इस नाम से कहे गए हैं जो रजस् एवं तमस् दोष रूप इन दोनों से निर्मुक्त होते हैं। जो रजस् और तमस् से निर्मुक्त होते हैं वे सर्वदा सत्य ही बोलते हैं। क्योंकि रजस् और तमस् से

निर्मुक्त में सत्त्वगुण के आधिक्य से दोषरहित ज्ञान होने के कारण कैसे भी असत्य-कथन सम्भव नहीं होता है। असत्य तो मिथ्या ज्ञान के कारण कहा जाता है अथवा सम्यक् ज्ञान होने पर भी राग-द्वेष के कारण असत्य कहा जाता है। रजस् एवं तमस् से निर्मुक्त लोग तो रागद्वेष से निर्मुक्त होते हैं, मिथ्या ज्ञान से रहित वे तो 'आप्त' इस श्रेष्ठ संज्ञा से नामित (सम्बोधित) होते हैं। वर्तमानकाल में तो जो अनुसन्धान कर्त्ता वैज्ञानिक होते हैं उनमें भी आप्त-संज्ञा व्यवहार करने योग्य है किन्तु वह संज्ञा तो केवल उस विषय तक ही सीमित है। इसलिए अनुसन्धान करने के बाद वे जो कुछ उस विषय के सम्बन्ध में कहते हैं वह तो सत्य ही होता है इसलिए आचरण करने योग्य भी होता है। प्राचीन महर्षियों में तो आप्तत्व प्रतिष्ठित था। इसलिए उनके उपदेश सर्वथा सत्य होते थे। इस समय के उपदेश वर्तमानकाल में भी आचरण करने योग्य और पालन करने योग्य हैं।

**2018 वर्षीयेऽस्मिन् सितम्बरात्मके मास एव विश्व-स्वास्थ्य-संगठनेनानुसन्धानात्मक एकः निष्कर्षः प्रकाशितः, यस्मिन् कथितं यत् 34 प्रतिशतात्मकाः वयस्काः भारतीयाः जनाः व्यायामं नैव कुर्वन्ति। कारणादस्मादलसीभूतास्ते विभिन्नैः रोगैराक्रान्ताः भवन्ति। यो निष्कर्षः वर्तमानकाले बहुभिर्वैज्ञानिकैः गम्भीरानुसन्धानानन्तरं प्रकाशितः सः तु बहुवर्षेभ्यः पूर्वमेव प्राचीनैः महर्षिभिः सिद्धान्तप्रतिष्ठापनपुरःसरः निर्दिष्टः। किन्त्वनेन वर्तमानवैज्ञानिकैः कृतस्यानुसन्धानस्य महत्त्वे न्यूनता नैवापतति। यदि जनाः व्यायामं न करिष्यन्ति तर्हि ते निश्चितरूपेण बहुभी रोगैः ग्रस्ताः भविष्यन्त्येव। प्राचीनकालत एवास्माकं भारते बहुसंख्यजनाः स्वभावत एव परिश्रमशीलाः सन्ति। किन्त्वधुना तु सुखदानां बहुविधानाम् उपकरणानामनुसन्धाने जनाः सुखाभ्यक्ता अलसीभूताः सन्तः श्रममेव न कुर्वन्ति।**

इस 2018 के सितम्बर मास में ही विश्व स्वास्थ्य-संगठन के द्वारा एक अनुसन्धानपरक निष्कर्ष प्रकाशित हुआ है, जिसमें कहा गया है कि 34 प्रतिशत वयस्क भारतीय लोग व्यायाम नहीं करते हैं। इस कारण जो निष्कर्ष वर्तमान काल में अनेक वैज्ञानिकों के द्वारा गम्भीर अनुसन्धान के बाद प्रकाशित किया गया है वह तो बहुत वर्ष पहले ही प्राचीन महर्षियों के द्वारा सिद्धान्त की स्थापनापूर्वक निर्दिष्ट था। लेकिन इसे वर्तमान वैज्ञानिकों के द्वारा किए गए अनुसन्धान के महत्त्व में कमी नहीं आ जाती है। यदि लोग व्यायाम नहीं करेंगे तो वे निश्चित रूप से अनेक रोगों से ग्रस्त होंगे ही। प्राचीन काल से ही हमारे भारत में अधिकांश लोग स्वभाव से ही परिश्रमशील हैं। (रहे हैं), लेकिन आज तो सुख देने वाले अनेक उपकरणों के अनुसन्धान के कारण लोग सुख के अभ्यस्त तथा आलसी होते हुए श्रम ही नहीं करते हैं।

**दिनचर्या-रात्रिचर्या-ऋतुचर्याणाञ्च विस्तृत-रूपेण निर्देशः प्राचीनेष्वायुर्वेदग्रन्थेषु विहितः। तेषां परिपालने तु वर्तमानकाले शिथिलता समागता। आचार्यश्चरकः निर्दिशति, यत्**

**तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।**
**अजातानां विकाराणामनुत्पत्तिकरञ्च यत्॥**

**(च.सू. 5/13)**

**अत्राचार्यस्य कथनस्य तात्पर्यमेतदस्ति यद् विशुद्धाहाराचाराभ्यां सदा शरीरस्य पोषणं**

**करणीयम्। एतदतिरिक्तं प्रत्यवायहेतुपरिहारोऽप्यावश्यकः। श्लोकस्य पूर्वार्धेनाचार्यः स्वास्थ्यपोषकहेत्वर्थं निर्दिशति, उत्तरार्धेन तु स्वास्थ्यविघातकहेतुपरिहारं कथयति। उभयस्वरूपस्य परिपालनं सर्वेषां ऋतूनां चर्याणां परिपालनेन भवति।**

प्राचीन आयुर्वेद-ग्रन्थों में दिनचर्या, रात्रिचर्या और ऋतुचर्या का विस्तृत रूप से निर्देश किया गया है। उनके परिपालन में तो वर्तमानकाल में शिथिलता आ गई है। आचार्य चरक कहते हैं कि-

उसका नित्य प्रयोग करना चाहिए जिससे कि स्वास्थ्य का अनुवर्तन (बने रहना, अनुगमन) होता है तथा जो रोग उत्पन्न नहीं हुये हैं उनको उत्पन्न न होने देने वाला हो (रोगों का अयवारण करने वाला हो)।

आचार्य के कथन का तात्पर्य यह है कि विशुद्ध आहार और आचरण (विहार, व्यवहार) से सदा शरीर का पोषण करना चाहिए। इसके अतिरिक्त विघ्नकारक (रुकावट करने वाले) हेतु का परिहार (त्याग, टालना) भी आवश्यक है। श्लोक के पूर्वार्ध से आचार्य चरक स्वास्थ्य-पोषक हेतु के लिए निर्देश देते हैं,उत्तरार्ध से वे स्वास्थ्य-विघातक हेतुओं के परिहार के लिए कहते हैं। दोनों प्रकार के स्वरूप का परिपालन सभी ऋतुओं की चर्याओं के परिपालन से हो जाता है।

**चर्याणां परिपालनक्रमः प्रातःकालात् ब्राह्ममुहूर्तादेव प्रारभते तथैषः क्रमः रात्रिपर्यन्तमाशयनात् प्रचलति। विस्तरेण निर्दिष्टस्यास्य क्रमस्यात्रोल्लेखस्यावश्यकता न वर्तते, किन्तु संक्षिप्ते संकेत एष एव पर्याप्तोऽस्ति यत् प्रातःकाले ब्राह्ममुहूर्ते सूर्योदयात् मुहूर्तद्वयपूर्वम् (4 घटिका पूर्वं, 90 मिनिट-पूर्वम्) एवोत्तिष्ठेत्, रात्रौ तु यदा सूर्योऽस्तमेति तदनन्तरं मुहूर्तत्रयानन्तरं ग्रीष्मे चतुर्मुहूर्तानन्तरन्त्वन्येषु ऋतुषु शयनं करणीयम्। मध्यमे तु समये स्वास्थ्यपरिपोषकहेतूनां परिपालनं प्रत्यवायहेतुपरिहरणक्रमश्च करणीयोऽस्ति। हेतुद्वयपरिपालनक्रम एव व्यायामस्य निर्देश आयुर्वेदमहर्षिभिः कृतः।**

चर्याओं के परिपालन का क्रम प्रातःकाल ब्राह्ममुहूर्त से ही प्रारम्भ हो जाता है तथा यह क्रम रात को सोने तक चलता है। विस्तार से निर्दिष्ट इस क्रम के उल्लेख की यहाँ आवश्यकता नहीं है। किन्तु संक्षेप में यही संकेत पर्याप्त है कि प्रातःकाल ब्राह्म मुहूर्त में सूर्योदय से दो मुहूर्त पहले (चार घड़ी पहले, 90 मिनिट पहले) ही उठना चाहिए, जब सूर्य अस्त हो जाता है उसके बाद रात्रि में ग्रीष्म ऋतु में तीन मुहूर्त (लगभग $2\frac{1}{4}$ घण्टे) के तथा अन्य ऋतुओं में चार मुहूर्त (लगभग $3\frac{1}{4}$ घण्टे) के बाद सो जाना चाहिए। बीच में समय (सुबह से रात तक) में तो स्वास्थ्य परिपोषक हेतुओं के टालने का क्रम करना चाहिए। दोनों हेतुओं के परिपालन-क्रम में ही आयुर्वेद के महर्षियों ने व्यायाम का निर्देश किया है।

**आचार्यश्चरकः निर्दिशति, यत्-**

**शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी।**
**देहव्यायामसंख्याता मात्रया तां समाचरेत्।।**

**(च.सू. 7/31)**

**या च इष्टा (अभिप्रेता) चेष्टा वर्तते सा करणीया। एषा चेष्टा व्यायामसंज्ञया संज्ञिता। आचार्यः सुश्रुतस्तु कथयति यत्- 'शरीरायासजनकं कर्म व्यायामसंज्ञितम्।' एतत्कर्म तु विधिपूर्वकमेव करणीयम्। शरीरेण विकृता चेष्टा न करणीया,**

**यद्यपि साऽपि शरीरायासजनका एव, किन्तु सा तु न व्यायामसंज्ञिताऽपितु अस्थिपेश्यादिषु विकृति-कारिणी सा रोगहेत्वात्मिक्येव। व्यवस्थितरूपेण कृतस्तु व्यायामः सुखदः स्वास्थ्यदश्च वर्तते-**

**लाघवं कर्मसामर्थ्यं स्थैर्यं दुःखसहिष्णुता।**
**दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।।**

**(च.सू. 7/32)**

आचार्य चरक निर्देश करते हैं कि- जो इष्ट (अभीष्ट, उपयुक्त) शरीर की चेष्टा स्थिरता(दृढता) लाने के लिए है और बल को बढाने वाली है, उसे देहव्यायाम कहा जाता हैं। इसे उचित मात्रा में करना चाहिए।

जो इच्छित (उपयुक्त) चेष्टा है वह करनी चाहिए। यह चेष्टा देहव्यायाम नाम से सम्बोधित की गई। आचार्य सुश्रुत तो कहते हैं कि 'शरीर में श्रम (थकावट) उत्पन्न करने वाले कर्म को व्यायाम कहा गया है।' यह कर्म तो विधिपूर्वक ही करना चाहिए। शरीर के द्वारा विकृत चेष्टा नहीं की जानी चाहिए। यद्यपि वह भी शरीर में थकान उत्पन्न करने वाली ही होती है, किन्तु वह तो व्यायाम संज्ञा वाली नहीं है अपितु अस्थि-पेशी आदि में विकृति करने वाली वह रोग को उत्पन्न करने वाले हेतु के रूप में ही होती है। व्यवस्थित रूप से किया गया व्यायाम तो सुख देने वाला और स्वास्थ्य प्रदान करने वाला होता है-

व्यायाम करने से शरीर में लघुता, कार्यकरने की सामर्थ्य, स्थिरता, दु:ख सहने की शक्ति (कफादि) दोषो का क्षय और जाठराग्नि की वृद्धि उत्पन्न होती है।

**आधुनिकाः कथयन्ति प्रतिदिनं 30 मिनिट-पर्यन्तं व्यायामः करणीयः। एकस्मिन् सप्ताहे 150 मिनिटात्मकः व्यायामः पर्याप्तिं निर्वर्तयति। अनेन सहैवातिरिक्तं वा 75 मिनिटात्मकः विशिष्टः व्यायाम एकस्मिन् सप्ताहे करणीयः। अर्थात् प्रतिदिनं 15 मिनिटात्मक एव व्यायामः पर्याप्तं वर्तते। विशिष्टे व्यायामे तू तीव्रतापूर्वकं व्यायामोऽभीष्टो वर्तते, यस्मिन् हि विशिष्ट आयासो भवति, स्वेदागमनं हृत्स्पन्दनञ्च विशेषेणाभिवर्धते। सप्ताहे दिनद्वयस्य-व्यायामः न करणीयः। पञ्चदिवसात्मक एव व्यायामः सुखदो भवति। व्यायामेन विभिन्नानां हृद्रोगाणां, मधुमेहस्य, स्थौल्यस्य, अनिद्रायाः स्मृतिह्रासस्य च निवारणं परिहरणञ्च भवति। अन्येऽपि बहवः रोगाः निवृत्ताः भवन्ति, निरन्तरञ्च स्वास्थ्यानुवर्तनं भवति।**

आधुनिक कहते हैं कि प्रतिदिन 30 मिनिट तक व्यायाम करना चाहिए। एक सप्ताह में 150 मिनिट का व्यायाम पर्याप्त होता है। इसके साथ ही या इसके अतिरिक्त एक सप्ताह में 75 मिनिट का विशिष्ट व्यायाम करना चाहिए। अर्थात् प्रतिदिन 15 मिनिट का ही व्यायाम पर्याप्त होता है। विशिष्ट व्यायाम में तो तीव्रतापूर्वक किया जाने वाला व्यायाम अभीष्ट है, जिसमें कि विशिष्ट श्रम (थकान) होता है और पसीने का आना तथा हृदयगति का बढना विशेषरूप से होता है। सप्ताह में दो दिन व्यायाम नहीं करना चाहिए। पाँच दिन का व्यायाम ही सुखदायी होता है। व्यायाम से विभिन्न हृद्रोगों का, मधुमेह का, मोटापे का, अनिद्रा का, स्मृतिह्रास का निवारण और परिहार होता है। और भी बहुत से रोग दूर हो जाते हैं तथा निरन्तर स्वास्थ्य का अनुबन्ध बना रहता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20


हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in



स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः


प्रतिष्ठायाम्,